केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

नवशृङ्खला ०९-१०

श्रीरामप्राणप्रतिष्ठा संवत् ०१

# संस्कृतवार्ता

ISSN : 0975-2676

षाण्मासिकं वार्तापत्रम्

वर्षम्- १४ विक्रमाब्दः २०८१ ज्येष्ठमासात् - पौषमासं यावत् जुलाई-दिसम्बर २०२४



## सम्पादकौ

प्रो. अजयकुमारमिश्रः
डा. पवनव्यासः

## सम्पादनसहयोगः

श्रीविनयकुमारशुक्लः

## प्रकाशकः

कुलसचिवः

केन्द्रीयसंस्कृतविश्वविद्यालयः

(संसद अधिनियमेन स्थापितः)



५६-५७, इन्स्टीट्यूशनल एरिया, जनकपुरी
नवदेहली - ११००५८

०११-२८५२४९९३,२८५२१९९४,२८५२०९७७
Email : sanskritvarta@csu.co.in

https://www.facebook.com/centralsanskrit
www.youtue.com/c/CentralSanskrit UniversityDelhi
https://twitter.com/centralsanskrit

Website: www.sanskrit.nic.in/publication_and_programme.php

Scan for E-Sanskrit varta



# कुलपति-सन्देशः

**विकसितभारताय संस्कृतम्-** संस्कृतम् अनादिकालात् सर्वासां भारतीयभाषाणां पोषणं कुर्वती अस्ति। विश्वस्मिन् विश्वे संस्कृतक्षेत्रे अस्माकं केन्द्रीयसंस्कृतविश्वविद्यालयः सर्वज्येष्ठः सर्वश्रेष्ठश्च इति मन्यते। अतः केन्द्रीयसंस्कृतविश्वविद्यालयस्य महत्तरं दायित्वं विद्यते यत् समाजस्य राष्ट्रस्य च विकासाय संस्कृतेन साधनेन अहर्निशं प्रयतनीयम्। विश्वविद्यालयो नाम गुरुशिष्यपरम्परायाः उत्कर्षस्य अधिष्ठानम्। त्यागधनेभ्यः गुरुभ्यः विद्यां सम्प्राप्य तस्याः विद्यायाः समाजस्य विकासाय प्रयोगे कुशलाः मेधाविनः शिष्याः एव विश्वविद्यालयस्य गौरवं वर्धयन्ति। भारतस्य ज्ञान-विज्ञानपरम्परायाः लोके पुनः सम्प्रतिष्ठा संस्कृतभाषासंवर्धनमाध्यमेन सहजतया शक्येत। संस्कृतेन संस्कृतिः रक्षिता भवति। तेन समाजे सौमनस्यं, तेन समाजे सुशान्तिर्भवति। शान्तिपूर्णे वातावरणे उत्तमा कार्यसंस्कृतिः विकसति। ततः राष्ट्रस्य सर्वविधो विकासो भवेत्। अतः केन्द्रीयसंस्कृतविश्वविद्यालयस्य सर्वैः शिक्षकैः छात्रैश्च सम्भूय विकसितभारताय सर्वात्मना संस्कृताध्यापनरूपः प्रयत्नो विधेयः।

**कार्यक्रमः साधनं न तु साध्यम्-** इतः परं विकसितभारताय संस्कृतं कथम् उपकारकं भवतु इति सञ्चिन्त्य प्रत्येकं परिसरे, प्रत्येकम् आदर्शमहाविद्यालये, प्रत्येकं शोधकेन्द्रे च कार्यक्रमाः भवेयुः। क्वचित् संस्थासु एवं दृश्यते यत् तत्रत्यो जनाः कार्यक्रमस्य आयोजनमेव साध्यम् इति चिन्तयन्ति किन्तु अस्माभिः सर्वदा अवधेयं यत् कार्यक्रमाः साधनत्वेन एव आयोजनीयाः। कस्यापि कार्यक्रमस्य आयोजनात् प्राक् अधिकारिभिः परिसरसदस्यैश्च तस्य परिणामविषये चिन्तनीयम्। "एतेन आयोजनेन एतत् फलं प्राप्तव्यम्" इति विचिन्त्य कार्यक्रमस्य फलप्राप्त्यनुकूला योजना चिन्तनीया। पुनश्च तेनैव विधिना क्रियान्वयनं भवेद् येन विधिना फलप्राप्तिः अवश्यं सम्भवेत्। कार्यक्रमस्य आयोजनानन्तरं पुनरपि आयोजकैः सम्भूय तस्य आयोजनस्य फलदृष्ट्या समीक्षणम् अपि विधेयम्। आशासे यद् इतः परं एतस्यां संस्कृतवार्तापत्रिकायां सफलं वृत्तान्तनिरूपणम् एव प्रकाशयिष्यते।

विद्वज्जनविधेयः
प्रो. श्रीनिवासः वरखेडी
कुलपतिः

## अभिनवप्रकाशनानि



# ।। यावच्चरामि खलु तत्र बुधाः प्रमाणम् ।।

**जुलैमासस्य २५तमे दिनाङ्के बिहारराज्यस्य राजभवने गुरुपूर्णिमायाः अवसरे आयोजिते व्याख्यानकार्यक्रमे केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिः श्रीनिवासवरखेडीवर्यः मुख्यवक्तृत्वेन आमन्त्रितः। कार्यक्रमस्य अध्यक्षः महामहिमराज्यपालः श्रीराजेन्द्रविश्वनाथ- आर्लेकरवर्यः आसीत्। एतादृशायोजनेन जगति गुरुशिष्यपरम्परायाः रक्षणं प्रसारश्च भविष्यति।**




उडुपिस्थितस्य ताराप्रकाशनन्यासद्वारा जुलैमासस्य २७तमे दिनाङ्के आयोजितेऽस्मिन् कार्यक्रमे केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. श्रीनिवासवरखेडीवर्यः मुद्रणक्षेत्रे भारतस्य प्रथमा-त्रि-आयामि (३डी) -मुद्रणप्रयोगशालायाः उद्घाटनमकरोत्। अनया प्रयोगशालया पाण्डुलिपीनां संरक्षणम्, संवर्धनं, वितरणञ्च सुलभं भविष्यति।





## ॥ सदा लोकहिते युक्ता रत्नदीपा इवोत्तमाः ॥

श्रीमद्दयानन्दकन्यागुरुकुलमहाविद्यालयस्य नवनिर्मितभवनस्य उद्घाटनकार्यक्रमे मुख्यातिथित्वेन विश्वविद्यालयस्य कुलपतिः प्रो. श्रीनिवासवरखेडीवर्यः अगस्तमासस्य प्रथमे दिनाङ्के भागमगृह्णात्। कार्यक्रमेऽस्मिन् राष्ट्रियस्वयंसेवकसङ्घस्य सरसङ्घसञ्चालकः श्रीमोहनभागवतवर्यः अपि उपस्थितः आसीत्।






वयं राष्ट्रे जागृयाम इत्युद्घोषं संसदि उद्घोषितवतां सर्वेषां नवनिर्वाचितसांसदानां सम्मानकार्यक्रमः संस्कृतभारतीदेहलीप्रान्तद्वारा अगस्तमासस्य अष्टमदिनाङ्के आयोजितः। एतस्मिन् सांसदसम्मानकार्यक्रमे माननीयः कुलपतिमहोदयः मुख्यातिथिरूपेण उपस्थाय सर्वेषां सम्माननं कृतवान्। कार्यक्रमेऽस्मिन् श्रीदिनेशकामतवर्यः, संस्कृतेन शपथं गृहीतवन्तः नवनिर्वाचिताः सांसदाः, संस्कृतमातुः सेवकाः, संस्कृतानुरागिणः च उपस्थिताः आसन्।



## ॥ मणेस्तुल्यं मूल्यं सहजसुभगस्य द्युतिमतः ॥

जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयस्य षष्ठदीक्षान्तसमारोहे, एवञ्च उत्तराखण्डसंस्कृत-विश्वविद्यालयस्य पक्षतः केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. श्रीनिवासवरखेडीवर्यः भारतीयविद्यासु दर्शनशास्त्रे च विशिष्टं योगदानमभिलक्ष्य विद्यावाचस्पतिः इत्युपाधिना सम्मानितः। वस्तुतः अनेन सम्माननेन सम्पूर्णं संस्कृतजगत् विश्वविद्यालयपरिवारश्च सम्मानितो अनुभवति। अवसरेऽस्मिन् राजस्थानराज्यस्य राज्यपालः माननीयः श्रीकलराजमिश्रवर्यः, उत्तराखण्डराज्यस्य राज्यपालः माननीयः श्रीगुरमीतसिंहवर्यः, जगद्गुरुरामभद्राचार्यदिव्याङ्गविश्वविद्यालयस्य कुलाधिपतिः जगद्गुरुः श्रीरामभद्राचार्यवर्यः, स्वामीगोविन्ददेव-गिरिवर्यश्च उपस्थिताः आसन्।





अक्तूबरमासस्य अष्टमदिनाङ्के अखिलभारतीयसंस्कृतसाहित्यसम्मेलने केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. श्रीनिवासवरखेडीवर्यः डा.गोस्वामीगिरधारिलालसंस्कृतगौरवपुरस्कारेण सम्मानितः। मञ्चेऽस्मिन् भारतस्य पूर्वशिक्षामन्त्री श्रीरमेशपोखरियालवर्यः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य कुलपतिचरः प्रो. रमेशपाण्डेयवर्यः अन्ये च गणमान्याः उपस्थिताः आसन्।



## ।। पाठयेम संस्कृतं जगति सर्वमानवान् ।।

नवप्रविष्टच्छात्त्राणां कृते ०२/०७/२०२४ तमे दिनाङ्के दीक्षारम्भकार्यक्रमः देहलीपरिसरे आयोजितः। अवसरेऽस्मिन् माननीयः कुलपतिमहोदयः छात्त्रानुद्दिश्य उदबोधयत् यत् छात्त्राः एव बौद्धिकपरम्परायाः नेतारः भवन्ति। अतः आचार्यैः ध्यानेन तेषां मनस्सु बौद्धिकबीजारोपणं करणीयम्। कार्यक्रमेऽस्मिन् आभारतं विद्यमानाः सर्वपरिसराणां प्रतिनिधयः, सम्बद्धमहाविद्यालयाः, शोधसंस्थाश्च अन्तर्जालमाध्यमेन सम्पृक्ताः आसन्।





केन्द्रीयसंस्कृतविश्वविद्यालयः,
आचार्यश्री-अकलङ्क-एजुकेशन-ट्रस्ट
इत्यनयोः संयुक्ततत्त्वावधाने जुलैमासस्य
दशमदिनाङ्कतः प्राकृतभाषायाः एकविंशतिः
दिवसीयकार्यशाला समायोजिता।

तत्र पूज्यः धवलकीर्तिस्वामिपादः,
तमिलनाडुराज्यस्य राज्यपालः महामहिम
श्रीरविन्द्रनारायणरविवर्यः, कुलपतिः आचार्यः
श्रीनिवासवरखेडीवर्यः च उपस्थितः आसीत्।
कार्यशालायां त्रयोदशराज्येभ्यः चत्वारिंशत्
चिताः अध्येतारः भागमगृह्णन्।




नवदेहलीस्थ मुख्यालये रक्षाबन्धनोत्सवमुपलक्ष्य आयोजिते कार्यक्रमे मुख्यालयस्य कर्मयोगिन्यः
कुलपतीनां मणिबन्धे रक्षाबन्धनं कृत्वा प्रमुदिताः।



# राष्ट्रं धारयतां ध्रुवम्

केन्द्रीयसंस्कृतविश्वविद्यालये अगस्तमासस्य १५तमे दिनाङ्के राष्ट्रियोत्सवरूपेण त्रिवर्णध्वजोत्तोलनेन स्वतन्त्रतादिवसस्य आचरणं हर्षोल्लासेन कृतम्। पावनोत्सवे मुख्यातिथिरूपेण तिरुपतिस्थ राष्ट्रियसंस्कृत-विश्वविद्यालयस्य कुलपतिः प्रो. जी.एस्.आर् कृष्णमूर्तिः, तिरुमलतिरुपतिदेवस्थानभक्तिप्रसारसरिण्यः निदेशकः डॉ. डी.पी अनन्तवर्यः, विश्वविद्यालयस्य कुलपतिः प्रो. श्रीनिवासवरखेडीवर्यः, विविधपरिसरस्य निदेशकाः, आचार्याः, छात्राः, कर्मचारिणश्च प्रत्यक्षपरोक्षरूपेण उपस्थिताः आसन्। एतादृशकार्यक्रमैः छात्राणां धमनिषु राष्ट्रभक्तिः सञ्जागर्ति।



# 'गुणैरासाद्यते पदम्'



विद्वानेव विजानाति
विद्वज्जनपरिश्रमम् इति
वाक्यस्य सार्थकतां भजते
विश्वविद्यालयः।



संस्कृतसप्ताहाङ्गरूपेण विद्वत्सपर्या, कलासपर्या, युवसपर्या, संस्कृतबालमहोत्सवः, कविसपर्या, संस्कृतसपर्याकार्यक्रमाणाम् आयोजनं कृतम्। आयोजनेऽस्मिन् आसप्ताहं यावद् विभिन्नक्षेत्रे कृतभूरिपरिश्रमाणाम् आचार्याणां व्याख्यानं, मार्गदर्शनं, सम्माननं च विहितम्। अवसरेऽस्मिन् कुलपतिमहोदयः प्रो. श्रीनिवासवरखेडीवर्यः उक्तवान् यद्  एषः कार्यक्रमः शास्त्रमहिम्नः श्रीवृद्धिं कर्तुम् अत्यावश्यकः वर्तते। छात्राणां मार्गदर्शने विद्वत्परम्परायाः रक्षणे च अस्य सम्यग्रूपेण विनियोगः करणीयः।













अगस्तमासस्य २१तमे दिनाङ्के नवदेहलीस्थ मुख्यालये केन्द्रीयसंस्कृतविश्वविद्यालयस्य अधिष्ठातृसमितौ कुलपतिमहोदयस्य आध्यक्ष्ये निर्णयः स्वीकृतः यद् विश्वविद्यालयस्य परिसरेषु दुर्लभशास्त्राणाम् अध्ययनार्थं छात्राणां कृते विशिष्ट-छात्रवृत्तिः प्रदास्यते। अनेन निर्णयेन दुर्लभशास्त्राणां, गुरुशिष्यपरम्परायाः च संरक्षणं सम्भविष्यति।





दिनद्वयव्यापिन्याः प्राच्यविद्याकौशलविकासकार्यशालायाः आयोजनं केन्द्रीयसंस्कृतविश्वविद्यालयस्य मुख्यालये अगस्तमासस्य २८तमे दिनाङ्के अभवत्। अस्याः कार्यशालायाः आयोजनेन संस्कृतेः कौशलोत्कर्षपूर्वकं छात्राणां सर्वाङ्गीणविकासः भविष्यति इति विचिन्त्य त्रिभ्यः संस्कृतविश्वविद्यालयेभ्यः अध्यापकाः समाहूताः। अवसरेऽस्मिन् माननीयः कुलपतिमहोदयः प्रो. श्रीनिवासवरखेडीवर्यः उक्तवान् यत् ज्ञानक्षेत्रे अधुना तादृशः अवसरः सम्प्राप्तः यद् वयम् समाजस्य अपेक्षानुगुणं समाजाय प्रदातुं सज्जाः स्मः।

# समानी व आकूतिः समाना हृदयानि वः



त्रिवेणीसङ्गमवत् विश्वविद्यालयत्रयस्य उत्कर्षमहोत्सवः भारतीयतकनीकीशिक्षापरिषद् सभागारे श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयस्य आध्वर्यवे अगस्तमासस्य २२तमे दिनाङ्के अभवत्। कार्यक्रमस्यास्य उद्घाटनं केन्द्रीयमन्त्री श्रीगिरिराजसिंहमहोदयस्य आध्यक्ष्ये अभवत्।



कार्यक्रमेऽस्मिन् त्रयाणां संस्कृतविश्वविद्यालयानां कुलपतयः, श्रीचमूकृष्णशास्त्रिवर्यः, श्रीदिनेशकामतवर्यः अन्ये च संस्कृतजगतः विद्वांसः उपस्थिताः आसन्। पूर्णाहुतिसत्रे अतिथिरूपेण माननीया सांसद् महोदया बांसुरीस्वराजवर्या, श्रीमहेन्द्रनाथपाण्डेयवर्यः च उपस्थिताः आसन्।



मञ्चे विविधक्षेत्रे कृतभूरिपरिश्रमाणां विदुषां प्राच्यविद्याभूषणं, संस्कृतसेवावृत्तिसम्माननेन च अभिनन्दनं कृतम्।



संस्कृतजगतः चतुर्दिक्समुन्नयनार्थम् उत्कर्षमहोत्सवः प्रतिवर्षम् आयोज्यते।

## ॥ आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम् ॥

उत्कर्षमहोत्सवे भारतीयज्ञानपरम्परायाः रक्षणार्थं विविधविद्याक्षेत्रे कृतभूरिपरिश्रमाणाम् आचार्याणां विविधोपाधिप्रदानेन सम्माननम् कृतम्। पूर्वसूरिणाम् अनेन सम्माननेन संस्कृतजगति नवागतानाम् आचार्याणां सरलमानकसंस्कृतमाध्यमेन ग्रन्थादिलेखने उत्साहवर्धनं भविष्यति।



सम्पूर्ण-प्रपञ्चे जायमानायाः अन्तर्जालिकघटनायाः विषये 'साइबर-सुरक्षा' इति नाम्नः कार्यक्रमः विश्वविद्यालये आयोजितः। मुख्यातिथिरूपेण श्री एच.एस रन्धावावर्यः उपस्थितः आसीत्। अस्य कार्यक्रमस्य आयोजनेन अधिकारिणः, छात्राः, कर्मचारिणश्च साइबर-सुरक्षा-विषये जागरूकाः अभवन्।





केन्द्रीयसंस्कृतविश्वविद्यालयस्य मुख्यालये शिक्षकदिवसमाधृत्य विदुषां सम्मानकार्यक्रमे स्वामी श्री प्रणवानन्दवर्यः, प्रो.वाचस्पतित्रिपाठिवर्यः, प्रो.शशितिवारिवर्या, डॉ. श्रीकृष्णसेमवालवर्यः, डॉ. नोदनाथमिश्र-प्रभृतीनां विदुषां सम्माननमभवत्। अवसरेऽस्मिन् कुलपतिः प्रो. श्रीनिवासवरखेडीवर्यः 'राष्ट्रियशिक्षानीतिः २०२० इति' अभिलक्ष्य उक्तवान् यद् भारतस्य प्रत्येकं जनेन इमाः पञ्च प्रतिज्ञाः अवश्यमेव स्वीकर्तव्याः। तत्र १. विकसित भारताय ज्ञानं भवेत्, २. औपनिवेशिक-मानसिकदासतायाः मुक्तिः, ३. भारतीय-ज्ञानपरम्परायाम् अक्षुण्णश्रद्धा, ४. भारतस्य अखण्डता, ५. स्वकर्तव्यपरायणता च। सम्मानमेतत् व्यक्तिविशेषस्य न अपितु संस्कृत जगतः अस्ति। कार्यक्रमास्यास्य आयोजनेन आचार्यानूचानयोः सम्बन्धः दृढः भविष्यति इति कुलपतेः विशेषकार्याधिकारी प्रो. मधुकेश्वरभट्टवर्यः अकथयत्।





केन्द्रीयसंस्कृतविश्वविद्यालयस्य ई-ग्रन्थालयस्य लोकार्पणं शिक्षकदिवसे अभवत्। माननीयः प्रो. श्रीनिवासवरखेडीवर्यः ई-ग्रन्थालयं समुद्घाट्य छात्राणां कृते समर्पितवान् । ग्रन्थालयाध्यक्षः डॉ. पूरणमलगुप्तावर्यः अस्य उपयोगितायाः विषये उक्तवान् यद् विश्वविद्यालयोत्कर्षे ग्रन्थालयस्य महद्योगदानं भवति। इतः परं छात्राः ई-ग्रन्थालयमाध्यमेन यत् किमपि पुस्तकम् अन्वेषयितुं शक्नुवन्ति। शोधच्छात्राः शोधप्रबन्धनादिकमपि अत्र अन्वेष्टुं शक्नुवन्ति।



'गान्धिजयन्ती' स्वच्छतादिवसरूपेण अक्तूबरमासस्य द्वितीयदिनाङ्के केन्द्रीयसंस्कृतविश्वविद्यालयस्य परिसरेषु, मुख्यालयस्य विविधेषु अनुभागेषु च आसप्ताहं समाचरिता। जनकपुर्यां विद्यमानेषु उद्यानेषु सनातनधर्ममन्दिरस्थ उद्यानस्य स्वच्छताकार्यं कृतम्। स्वच्छतादिवसाचरणे विश्वविद्यालयस्य छात्रकल्याण-अधिष्ठाता प्रो. मदनमोहनझावर्यः अन्ये च अधिकारिणः, कर्मयोगिनश्च उपस्थिताः आसन्। स्वच्छे वातावरणे प्रसादयुक्तं भवति मनः इत्यतः अयं दिवसः आचरितः।

# प्रतीच्यसागरतीरे प्राच्यविद्या



एकपञ्चाशत्तमम् अखिलभारतीयप्राच्यविद्यासम्मेलनम् केन्द्रीयसंस्कृतविश्वविद्यालयः, भारतीयविद्वत्परिषद्, पर्याय-श्रीपुत्तिगेमठः इत्यनयोः संस्थयोः संयुक्ततत्त्वावधाने अक्तूबरमासस्य २४ तः २६ पर्यन्तम् उडुपिनगरे अभवत्। सम्मेलनस्य उद्घाटनावसरे पर्यायश्रीपुत्तिगेमठाधीशाः श्रीसुगुणेन्द्रतीर्थस्वामिनः, पतञ्जलिपीठाधीशाः स्वामिराम-देववर्यः, कुलपतिः प्रो. श्रीनिवासवरखेडीवर्यः, श्रीचमूकृष्णशास्त्रिवर्यः, आचार्यः श्रीबालकृष्णवर्यः, प्रो. सरोजाभाटेवर्या, प्रो. कविताहोळेवर्या, प्रो. शिवानीवर्या अन्ये च देशस्य नानाप्रान्तेभ्यः समागताः भारतभारती-विद्यारसिकाः, वरेण्याः विद्वांसः उपस्थिताः आसन्।





सम्मेलने सांस्कृतिककार्यक्रमाणाम् विविधविषयाणाञ्च पत्रप्रस्तुतिः अभवत्। विश्वविद्यालयप्रकाशनद्वारा द्विपञ्चाशत् ग्रन्थानाम् विमोचनमपि कार्यक्रमेऽस्मिन् अभवत्। सम्मेलनस्य महत्त्वमुद्बोधयन् प्रो. श्रीनिवासवरखेडीवर्यः अवदत् यत् अनेन प्रामाणिकशोधलेखनशैल्याः वर्धनं भविष्यति। अवसरेऽस्मिन् श्रीनन्दकिशोरपत्तरकिनेमहोदयेन विरचितस्य 'प्राच्यप्रभा भारतविद्या च' इत्याख्यस्य ग्रन्थस्य लोकार्पणं विहितम्। एतस्मिन् ग्रन्थे विश्वप्राच्यविद्यापरिषदः विगतेषु शतेषु वर्षेषु सञ्जातानाम् अधिवेशनानाम् ऐतिह्यं सारभूतं तत्त्वं च वर्णितमस्ति। प्रसङ्गेऽस्मिन् आचार्य श्रीनिवासवरखेडी-महोदयेन विरचितस्य शास्त्र-पद्धितिरिति ग्रन्थस्य हिन्दीभाषया अनुवादः "शास्त्रपद्धतिः" पुस्तकमपि लोकार्पितम्। अनुवादकः प्रो. अजयकुमारमिश्रः।



केन्द्रीयसंस्कृतविश्वविद्यालयस्य ५४ स्थापनादिवसः अक्तूबरमासस्य १५तमे दिनाङ्के हर्षोल्लासेन समाचरितः। स्थापनादिवसोपलक्ष्ये मुख्यातिथिरूपेण संयुक्तसचिवा श्रीमती प्रसादवर्या (भाषाविभागः, भारतसर्वकारः) उपस्थिता आसीत्। अवसरेऽस्मिन् कुलपतिः प्रो. श्रीनिवासवरखेडीवर्यः उक्तवान् यत् एषः उत्कर्षः अस्माकं पूर्वसूरिणां, कर्मयोगिनाञ्च प्रतिफलं वर्तते। कार्यक्रमेऽस्मिन् सेवानिवृत्तानां, सेवारतानां कर्मचारिणां सम्माननमपि अभवत्। कार्यक्रमस्य आयोजनेन विश्वविद्यालस्य स्थापनायाः उद्देश्यं, लक्ष्यं, पूर्वकृतपरिश्रमाणाम् अधिकारिणां, कर्मचारिणाञ्च सेवा, त्यागः, परिश्रमादीनां स्मरणम्, सेवारतानां स्व-उत्तरदायित्वस्य च बोधः अभवत्।

## प्रवेष्टुकामाः लक्ष्याकृतिमाकर्षयन्तु

क्रीडास्तम्भितशिक्षायाः द्वितीयसोपानक्रमे संस्कृतक्रीडाधारितपरीक्षायाः आयोजनं केन्द्रीयसंस्कृतविश्वविद्यालयद्वारा बालस्तरे, किशोरस्तरे, युवस्तरे, प्रौढस्तरे च सितम्बरमासस्य २४-२५ दिनाङ्कयोः कृतम्। परीक्षायां ११०६४ संख्याकाः संस्कृतप्रेमिणः भागं ग्र हीतवन्तः। अस्याः परिणामः नवम्बरमासस्य पञ्चमदिनाङ्के उद्घोषितः। माननीयः कुलपतिवर्यः परीक्षामुत्तीर्णकृद्भ्यः सर्वेभ्यः अभिनन्दनानि व्याहरत्। अवसरेऽस्मिन् कुलसचिवः प्रो. रा.गा.मुरळीकृष्णवर्यः, प्रो.मदनमोहनझावर्यः, प्रो.मधुकेश्वरभट्टवर्यः, डा. अमृताकौरवर्या अन्ये च अधिकारिणः, छात्राः, कर्मचारिणः उपस्थिताः आसन्। अनया परीक्षया विश्लेषण-चिन्तनप्रक्रियायाः वृद्धिः, आत्मविश्वासः कौशलानां विकासश्च अभवत् एवं संस्कृतभाषायां विद्यमानानां गूढतत्त्वानां सहजरूपेण प्रसारः बालेषु, सामाजिकजनेषु च अभवत्।

त्रिदिवसीयान्ताराष्ट्रिय-महिलासङ्गोष्ठी देहलीविश्वविद्यालयस्य सत्यवतीमहाविद्यालये केन्द्रीयसंस्कृतविश्वविद्यालयस्य आर्थिकसहयोगेन नवम्बर मासस्य १६तमे दिनाङ्के आयोजिता।






संगोष्ठ्याः संरक्षकत्वेन प्रो. श्रीनिवासवरखेडीवर्यः दीपदीपनेन अस्याः उद्घाटनम्  अकरोत्। अस्यां सङ्गोष्ठ्यां महिलानां रक्षा, शिक्षा, उत्थानादिविषये अनेकानि शोधपत्राणि प्रस्तुतानि।











भारतसर्वकारस्य उच्चशिक्षा-अपरसचिवः श्रीः सुनीलवर्णवालवर्यः केन्द्रीयसंस्कृतविश्वविद्यालयस्य निरीक्षणार्थं नवम्बरमासस्य १६तमे दिनाङ्के आगतः। प्रो. श्रीनिवासवरखेडीवर्यः तस्य स्वागतं समाचरत्। श्रीवर्णवालमहोदयः विश्वविद्यालस्य प्रगतिं दृष्ट्वा प्रमुदितः। भाविनिकाले विश्वविद्यालयस्य सर्वदिक्षु विकासाय तेन महोदयेन स्वीयविचारः अपि अभिव्यक्तः। चतुर्दिक् विकासाय दृष्टिमपि प्रदत्तवान्।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य अमृतमहोत्सवग्रन्थमालायोजनायाः अन्तर्गते प्रो. आर्.एन् अयङ्गरमहोदयेन विरचितस्य 'महासलिलम्' इति पुस्तकस्य विमोचनं बेङ्गलूरुनगरे २८तमे दिनाङ्के डॉ. एस. सोमनाथवर्यस्य आध्यक्ष्ये प्रो. श्रीनिवासवरखेडीवर्याणाम् आतिथ्ये चाभवत्। एतत् पुस्तकं भारतीयज्ञानपरम्परायाः वृद्धगार्गीय ज्योतिषस्यभागमस्ति। प्राचीनार्वाचीन-विधयोः एतत् पुस्तकं छात्राणां, शोधच्छात्राणाम्, अनुसन्धानकर्तॄणां कृते महत्त्वपूर्णं विद्यते।







केन्द्रीयसंस्कृतविश्वविद्यालये दिसम्बरमासस्य ११तमे दिनाङ्के गीताजयन्ती, भारतीयभाषोत्सवस्य च आयोजनमभवत्। कार्यक्रमेऽस्मिन् गीतायाः सस्वरवाचनम् एवं भारतीयभाषाणां माध्यमेन मुख्यालयस्य अधिकारिणः शोधच्छात्राश्च स्वकीयान् भावान् प्रकटितवन्तः।

अवसरेऽस्मिन् विश्वविद्यालयस्य कुलसचिवः प्रो.आर् जी मुरळीकृष्णवर्यः, विविधपरिसरस्य निदेशकाः, अधिकारिणः, छात्राः, कर्मचारिणश्च प्रत्यक्ष-परोक्षरूपेण च उपस्थिताः आसन्। विश्वविद्यालयद्वारा एतादृशायोजनेन भारतीयभाषाः समृद्धाः भविष्यन्ति। भविष्ये साहित्यसांस्कृतिकक्षेत्रे अधिकानि स्रोतांसि साक्ष्याणि च उपलभ्यमाणानानि भवेयुरिति। अनेन क्षेत्रीयभाषाः अपि राष्ट्रस्य मुख्यधारायाम् आबद्धाः भविष्यन्ति।







तिरुपतिस्थे राष्ट्रियसंस्कृतविश्वविद्यालये दक्षिणवलयस्य 'Fit India Week Celebration' कार्यक्रमाङ्गतया दिसम्बरमासस्य ३०,३१ दिनाङ्कयोः आयोजितायां क्रीडास्पर्धायां परिसरस्य छात्राः भागं गृहीत्वा पुरस्कारभाजाः अभूवन्।

# स्वाध्यायान्मा प्रमदः

केन्द्रीयसंस्कृतविश्वविद्यालयस्य मुक्तस्वाध्यायपीठद्वारा देशस्य विभिन्नेभ्यः कोणेभ्यः शैक्षणिक-केन्द्राणि समुद्घाटितानि । आभासिक माध्यमेन अपि मुक्तस्वाध्यायपीठे आबालवृद्धाः, नागरिकाः, छात्राः, कर्मचारिणः, संस्कृताध्येतुकामाः, शास्त्राध्ययनेच्छुकाः च देशविदेशे, स्वस्थाने च स्थित्वा अध्ययनं कर्तुं प्रभवन्ति ।






मुक्तस्वाध्यायपीठस्य संस्कृताध्ययनकेन्द्रेण बेङ्गलूरुनगरे आयोजिते संस्कृतशिक्षकप्रशिक्षणवर्गे दिसम्बरमासस्य ११तमे दिनाङ्के भारतीयभाषापरिवारोत्सवः आयोजितः । अस्मिन् कार्यक्रमे आहत्य १७ राज्येभ्यः सप्तदशाधिकभारतीयभाषाणां प्रातिनिध्यम् आसीत् । एतदङ्गतया बहुविधाः चित्ताकर्षककार्यक्रमाः अपि आयोजिताः । कार्यक्रमे उपस्थिताः आसन् श्री दिनेशकामतवर्यः, प्रो. परमेश्वरनारायणशास्त्रिवर्यः, प्रो. वाइ. एस्. रमेशवर्यः, प्रो. रत्नमोहनझावर्यः, डा. महाबलेश्वरभट्टवर्यः, श्री कू. वेङ्कटेशमूर्तिः इत्यादयः ।

# गीर्वाणवाणीविजयवैजयन्तीविश्वयात्रा







केन्द्रीयसंस्कृतविश्वविद्यालयः, स्वामीनारायण BAPS इत्यनयोः संस्थयोः सितम्बरमासस्य ०७ दिनाङ्कतः १५ दिनाङ्कपर्यन्तम् आयोज्यमाने अन्तर्राष्ट्रीयसंस्कृतसम्मेलने भारतात् विद्वत्समूहः आष्ट्रेलियादेशं प्रति प्रस्थितः। विद्वत्समूहे विश्वविद्यालयस्य कुलपतिमहोदयः प्रो. श्रीनिवासवरखेडीवर्यः, सोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. सुकान्तकुमार-सेनापतिवर्यः, प्रो. गणेश ति. पण्डितवर्यः, डॉ. पवनव्यासवर्यः च आसन्। ब्रिसबेननगरे संस्कृतपाठ्यक्रमस्योपरि चर्चा अभवत्। आष्ट्रेलियादेशस्य सिडनीनगरे संस्कृतसम्मेलनम्, महन्तपाठशालायाः उद्घाटनम् च स्वामी भद्रेशदासवर्याणाम् आध्यक्ष्ये अभवत्।









प्रो. श्रीनिवासवरखेडीवर्यः संस्कृतक्षेत्रे उत्तममार्गदर्शकः इति मत्वा BAPS इति संस्थया संस्कृतराजदूतः इत्युपाधिना सम्मानितः। अन्ये सर्वेऽपि विद्वांसः प्रश्नकालसत्रे शोधच्छात्राणां संस्कृतक्षेत्रे मार्गदर्शनं कृतवन्तः। अनया यात्रया आष्ट्रेलियादेशे निवसतां भारतीयमूलनिवासिनां तेषां बालानां च भारतीयसंस्कृतेः सञ्चारः अभवत्। संस्कृतस्य 'वसुधैवकुटुम्बकम्' इति सन्देशः आष्ट्रेलियादेशे प्रसरितः।













# संविज्ञापकम्



केन्द्रीयसंस्कृतविश्वविद्यालयः, माधवगणितकेन्द्रम्, शिक्षासंस्कृति-उत्थान-न्यासः इत्यनयोः संस्थयोः अगस्तमासस्य १४ तमे दिनाङ्के अकादमिक-संविज्ञापकमभवत्। अनेन संविज्ञापकेन भारतस्य प्राचीनगणितपरम्परायाः विकासः भविष्यति। विषयेऽस्मिन् उत्तमपरिणामप्राप्तये शोधच्छात्राणां कृते द्विगुणितं छात्रवृत्तिमपि विश्वविद्यालयेन प्रदाष्यते इति कुलपतिना सहर्षमुद्घोषणा कृता। एनामुद्घोषणां श्रुत्वैव शोधच्छात्राः प्रमुदिताः।



२७तमे दिनाङ्के केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली , फो.गुआंग विश्वविद्यालयः ताइवान इत्यनयोः संस्थयोः संयुक्ततत्त्वाधाने सहमतिज्ञापनपत्रे हस्ताङ्कनमभवत्। एवमेव दिसम्बरमास पर्यन्तं नव संस्थाभिः विश्वविद्यालयेन साकं सहमतिपत्रे हस्ताङ्कनं कृतम्।

शास्त्रितृतीयवर्षीयाणां, शिक्षाशास्त्रिद्वितीय- वर्षीयाणां, आचार्यद्वितीयवर्षीयाणां च छात्राणामुपयोगाय बेङ्गलूरुनगरस्थ धी-अकादमि इत्यनया संस्थायाः सहयोगेन परिसरे १०-११ दिनाङ्कयोः मीमांसाविभागाध्यक्षस्य प्रो. सूर्यनारायणभट्टवर्यस्य न्यायविभागीय- प्राध्यापकस्य डा. राघवेन्द्र पि आरोळीवर्यस्य च आयोजकत्वे 'Career Guidance and Life Visioning' इति विषयिणी दिनद्वयव्यापिनी कार्यशाला आयोजिता । निदेशकः आचार्यः हंसधरझावर्यः कार्यक्रमस्य उद्घाटनसत्रे आध्यक्ष्यं निरवहत् । धी-अकादमीसंस्थायाः निदेशिकया डा. काव्या अनन्तमहाभागया, तत्संस्थाधिकारिणा श्रीमता विनयवर्येण च छात्रैः सह संवादमुखेन विविधक्षेत्रेषु सर्वकारीयोद्योगावसरः इत्यमुष्मिन् विषये उद्बोधनमकारि । अनेन कार्यक्रमेण उपाशीतिः छात्राः फलभाजोऽभूवन् ।





छात्राणां शास्त्रवाक्यार्थप्रस्तुति- कौशलसंवर्धनाय संस्थापितया वाक्यार्थपरिषदा परिसरीय- द्वितीयतलसभाभवने द्वितीयमधिवेशनं समायोजितम् । तत्र च पञ्चानामध्यापकानां विविधेषु शास्त्रेषु वाक्यार्थः सम्पन्नः । अधिवेशनेऽस्मिन् सर्वे अध्यापकाः भागमूढ्वा सभायाः शोभां वर्धितवन्तः तथा च छात्राः लाभान्विताः अभूवन् ।



प्रतिवर्षमिवामुष्मिन्नपि श्रावणकृष्णप्रतिपत्प्रभृतिनवमीं यावत् संस्कृतसप्ताहोत्सवः परिसरे आचरितः। तदङ्गतया कार्यक्रमाणामायोजनाय काचन समितिरारचिता यत्र आचार्यः चन्द्रकान्तवर्यः संयोजकत्वेन कार्यमवहत् । श्रीदक्षिणाम्नाय शृङ्गेरीशारदापीठाधीश्वराणां जगद्गुरुश्रीभारतीतीर्थमहास्वामिनां परमानुग्रहेण जगद्गुरुश्रीविधुशेखरभारतीमहास्वामिनां सन्निधौ नृसिंहवने कार्यक्रमस्य उद्घाटनकार्यक्रमः समायोजि। अस्मिन्नावसरे जगद्गुरुकरकमलाभ्यां वाक्यार्थभारतीनाम्नी शोधपत्रिका, भारती इत्याख्या परिसरस्य वार्षिकी पत्रिका चाविष्कृतिं आनयति। परिसरस्य सर्वेऽपि छात्राः प्राध्यापकाश्च कार्यक्रमे भागमवहन्। तिरुपतिस्थधर्मगिरिसंस्कृतपाठशालायाः अध्यक्षाः कुप्पाशिवसुब्रह्मण्यावधानिनः, राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिचराः सच्चिदानन्दउडुपवर्याश्च उपस्थाय कार्यक्रमस्य शोभामवर्धयन्। कार्यक्रमे परिसरनिदेशकः आचार्यः हंसधझामहोदयः सर्वेभ्यः स्वागतं व्याहरत्। न्यायविद्याशाखासमन्वयकेन आचार्यनवीनहोळमहोदयेन धन्यताविष्कृतिश्च अकारि। उद्घाटनानन्तरं छात्राः अध्यापकाश्च सम्भूय शृङ्गेरीनगरप्रदेशे श्रीशारदामन्दिरस्य मुख्यद्वारात् अभिनवविद्यातीर्थप्रौढशालापर्यन्तं शोभायात्राम् अकुर्वन्। तदनु आसप्ताहं छात्राणां कृते सिद्धभाषणस्पर्धा, आशुभाषणस्पर्धा, सम्भाषणस्पर्धा, अक्षरश्लोकीस्पर्धा, सुभाषितकण्ठपाठस्पर्धा, भगवद्गीताकण्ठस्पर्धा, स्तोत्रकण्ठस्पर्धा इत्यादयः नैकाः कार्यक्रमाः परिसरीयप्राध्यापकानां सहयोगेन समायोजिताः ।








शिक्षकदिवससमारोहे शृङ्गेरीपदवीपूर्वविद्यालयस्य संस्कृतशिक्षकस्य श्रीश्रीशभट्टमहोदयस्य शिक्षकप्रवर इति विरुदेन सम्माननं कृतम्। महोदयस्य आकर्षकं भाषणम्, आचार्यस्य चन्द्रकान्तमहोदयस्य अध्यक्षता, आचार्यबालाजीवर्यस्य स्वागतवचः, डा. अरविन्दकुमारसोमदत्त- डा.उमामहेश्वररावुवर्ययोः संयोजकत्वम्, छात्राणां गुरुवन्दनकार्यक्रमश्च अस्मिन् समारोहे विशेषस्थानं भजन्ते।





छात्रकल्याणस्पर्धिष्णुवाक्यार्थपरिषदामुद्घाटनकार्यक्रमः संपन्नः। तत्र न्यायवेदान्तविद्वान् श्रीसन्दीपशर्ममहोदयः मुख्याभ्यागतत्वेन समागत्य वाग्वर्धिनीपरिषदः महत्त्वमुद्बोधितवान्, परिषत्पदाधिकारिणश्छात्रांश्च अभिनन्दितवान् । निदेशकेन आचार्यहंसधरझामहोदयेन अध्यक्षभाषणं विहितम्। वेदिकायामुपस्थितैः आचार्यनवीनहोळः-चन्द्रशेखरभट्टः- गणेश ईश्वरभट्टमहोदयैः डा. कृष्णानन्तपद्मनाभ-श्रीकरमहोदयाभ्यां च स्वागतभाषणादिकार्याणि निर्वर्तितानि ।




हिन्दीपखवाडाकार्यक्रमस्य समापनसमारोहः आचरितः। अत्र हिन्दीभाषाविषये छात्राणां कर्मचारिणां च कृते आयोजितासु स्पर्धासु विजेतृभ्यः पुरस्कारः प्रदत्तः। छात्रैः भाषणं काव्यपठनं च विहितम्। मुम्बई तः समागतः परमाणु उर्जा कनिष्ठमहाविद्यालयस्य हिन्दीप्राध्यापकः डा. धनुर्धरझामहोदयः मुख्यातिथिः, बसरीकट्टे सद्गुरुविद्यालस्य हिन्दीअध्यापकः श्री. आर्. भानुप्रकाशमहोदयः विशिष्टातिथिश्च आस्ताम्। परिसरनिदेशक आचार्यः हंसधरझामहोदयः अध्यक्षतामकरोत्। डा. दयानिधिशर्ममहोदयः कार्यक्रम-संयोजनमकरोत्। डा. ब्रजेशपाठक-रविशास्त्रि-रामजियावनप्रजापतिमहोदयैः स्वागतादिभाषणानि विहितानि ।

वाक्यार्थपरिषदः प्रथममधिवेशनं प्रवृत्तम्। तत्र निदेशकः डा. हंसधरझावर्यः, डा. एस् वेङ्कटेशताताचार्यवर्यः, डा. शिवकुमारीकाटूरिवर्या, डा. ब्रजेशपाठकवर्यश्च वाक्यार्थान् उपस्थापितवन्तः। निदेशकवर्येण पर्यवेक्षणभाषणं च कृतम्। परिषत्पदाधिकारिणः आचार्यचन्द्रकान्त-गणेशभट्टवर्यौ डा. राघवेन्द्र आरोळिमहोदयश्च स्वागतादिकार्यनिर्वहणमकरोत्।







शृङ्गेरीस्थे राजीवगान्धिपरिसरे केन्द्रीयसंस्कृतविश्वविद्यालयादेशानुसारं परिसरनिदेशकस्य मार्गदर्शने ०१/१०/२०२४ दिनाङ्के परिसरीयाध्यपकाः छात्राः कर्मचारिणश्च परिसरस्य अन्तः बहिश्च 'स्वच्छता हि सेवा' कार्यक्रमाङ्गत्वेन सेवामनोभावेन स्वच्छताकार्यमकुर्वन् ।



केन्द्रीयसंस्कृतविश्वविद्यालयः श्रीराजीवगान्धीपरिसरः, शृङ्गेरी कार्मिकमित्रबळग शृङ्गेरी इत्यनयोः संयुक्तसंयोजने परिसरे २२/११/२०२४ दिनाङ्के सुदुघासभाभवने कन्नडराज्योत्सवसमारोपकार्यक्रमः समनुष्ठितः । तत्र श्रीजनार्दनमण्डगारुमहोदयः अभ्यागतत्वेन समागतः । परिसरनिदेशकः प्रो. हंसधरझामहोदयः सभाध्यक्ष्यं निर्वर्तितवान् । अपराह्ने ३वादनतः छात्राणां सांस्कृतिककार्यक्रमाः अभूवन् ।




केन्द्रीयसंस्कृतविश्वविद्यालयस्य राजीवगान्धीपरिसरे २४/१२/२०२४ दिनाङ्के सुशासनदिवसः समाचरितः । तत्र च शिक्षाशास्त्रिविद्याशाखायाः अध्यापकः डा. दयानिधिशर्ममहोदयः सुशासनविषये उपन्यासं कृतवान्। परिसरनिदेशकः अध्यक्षभाषणं कृतवान्। सर्वे छात्राः अध्यापकाः च भागं गृहीत्वा कार्यक्रमस्य शोभां वर्धितवन्तः ।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य राजीवगान्धीपरिसरे २३/१२/२०२४ दिनाङ्के राष्ट्रियगणितदिनमहोत्सवः समाचरितः। तत्र च उडुपिस्थपूर्णप्रज्ञमहाविद्यालयस्य प्राचार्यचरः आचार्यः ए पि भट्टमहोदयः अभ्यागतत्वेन समागत्य भारतीयगणितस्य विषये उद्बोधनं कृतवान् । परिसरनिदेशकः हंसधरझामहोदयः सभायाः आध्यक्ष्यं वहन् छात्रान् उद्बोधितवान् । सर्वे अध्यापकाः छात्राश्च भागमूढ्वा भारतीयगणितस्य विषये ज्ञानं प्राप्तवन्तः ।




राजीवगान्धीपरिसरे परिसरस्य प्राच्यां-दिशि विकसितभारतयोजनान्तर्गतत्वेन वृक्षारोपणकार्यक्रमः समनुष्ठितः। कार्यक्रमेऽस्मिन् शास्त्रिप्रथमवर्षच्छात्राः द्विपञ्चाशदधिकाः वृक्षारोपणं कृतवन्तः। तत्र च परिसरनिदेशकः, विकसितभारतम्@२०४७ समितेः समन्वयकः च उपस्थितौ।








७/११/२०२४ तः १०/११/२०२४ पर्यन्तं गुरुवायूरुपरिसरे प्रवृत्ते दक्षिणवलययुवमहोत्सवे राजीवगान्धीपरिसरात् ४० छात्राः भागं गृहीत्वा परिसरस्य द्वितीयस्थानम् आनीतवन्तः। डा.पुरम् अरविन्दकुमारसोमदत्तमहोदयः डा. रामचन्द्र एच् डि महोदयश्च मार्गदर्शकत्वेन गतवन्तौ। सर्वेऽपि छात्राः पुरस्कारस्कृताः।





केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरे जुलाईमासस्य एकोनत्रिंशत् दिनाङ्के व्यवसायिकजीवनवृत्तिपरामर्शकार्यशालायाः आयोजनं जातम् । कार्यशालायामस्याम्, कर्नाटकप्रदेशस्य बङ्गलूरूनगरतः धीः अकादम्याः निदेशिका डॉ काव्याऽनन्त, सहायकनिदेशकः श्री विनयः आर् महोदयैः भोपालपरिसरछात्र-छात्राणां विभिन्नप्रतियोगिपरीक्षासु चयनार्थं कथं कीदृशी च सन्नद्धता कर्तव्येति विषये सम्यगवबोधितम्।



भोपालपरिसरे अगस्तमासस्य चतुर्दशदिनाङ्कतः आरभ्य विंशतिदिनाङ्कं यावत् संस्कृतसप्ताहमहोत्सवस्याऽयोजनं जातम् । कार्यक्रमे विविध-प्रतियोगितानाम् आयोजनमभवत् । कार्यक्रमेऽस्मिन् श्रीरामानन्दसंस्कृतमहाविद्यालस्य संस्कृतविभागस्य आचार्याः प्रो. रघुवीरप्रसादगोस्वामिवर्याः, परिसरनिदेशकाः प्रो. रमाकान्तपाण्डेयवर्यः अन्ये च अधिकारिणः, छात्राः, कर्मचारिणश्च उपस्थिताः आसन्। अनेन छात्राः संस्कृतं संस्कृतेश्च महत्त्वं ज्ञास्यन्ति।

अगस्तमासस्य प्रथमदिनाङ्कतः आरभ्य सप्तमदिनाङ्कं यावत् सप्तदिवसीयाः संकायविकासकार्यक्रमकुक्षिभूताः संगणककार्यशालायाः आयोजनं भोपालपरिसरे अभवत्। अस्यां कार्यशालायां केन्द्रीयसंस्कृतविश्वविद्यालयस्य निखिलेऽपि भारते व्याप्तपरिसरेभ्यः संगणकप्राध्यापकाः भोपालपरिसरमागत्य भागम् ग्रहीतवन्तः। कार्यशालायामस्याम्, प्रो. रविकपूरवर्यः, डॉ यशपालशर्मावर्यः, अनिल-उपमन्युः प्रभृतयः नैके विद्वांसः प्रशिक्षणम् अददत। अनया कार्यशालया सङ्गणकीयशिक्षकाणां पाठनशैल्याः विकासः अभवत्।



भोपालपरिसरे सितम्बरमासस्य त्रयोदशदिनाङ्कतः आरभ्य एकोनविशंतिः इति दिनाङ्कपर्यन्तं परिसरीयनिदेशकानां सानिध्ये हिन्दीपक्षकार्यक्रमस्य अनुष्ठानमभवत्। समापनसत्रं भवभूतिप्रेक्षागारे सम्पन्नमभवत्। समापनसत्रे मुख्यातिथित्वेन मध्यप्रदेशहिन्दी-अकादम्याः अध्यक्षः अशोककण्डेलमहोदयः उपस्थितः आसीत्। कार्यक्रमेऽस्मिन् विविधस्पर्धाः आयोजिताः।







केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरे एकीकृतशिक्षकशिक्षाकार्यक्रमः ITEP छात्राणां कृते 'द्विसाप्ताहिकदीक्षारम्भकार्यक्रमः' वाग्देव्याः समर्चनेन समारब्धः। अस्य कार्यक्रमस्य सम्पूर्तिसमारोहः ०१/१०/२०२४ तमे दिनाङ्के अभवत्। अवसरेऽस्मिन् अखिलभारतीयसङ्गठनमन्त्री श्रीजयप्रकाशगौतमवर्यः, निदेशकः प्रो. रमाकान्तपाण्डेयवर्यः, सहनिदेशकः प्रो. नीलाभतिवारिवर्यः, अन्ये च परिसर-प्राध्यापकाः, अधिकारिणः, छात्राः, कर्मचारिणश्च उपस्थिताः आसन्। छात्राणां संस्कृतभाषायां गतिप्राप्त्यर्थं अयं कार्यक्रमः आयोजितः।

ज्योतिषशास्त्रपरम्परायामाधुनिकविधानां समावेशः एव ज्योतिषशास्त्रस्य सर्वव्यापकतां सूचयति। अद्यत्वे विभिन्नेषु क्षेत्रेषु कार्यं कुर्वाणाः जनाः अपि ज्योतिषशास्त्रे विशेषरुचिं प्रदर्शयन्ति। अभिरुचिकारणादेव ते विशिष्टं योगदानमपि यच्छन्ति। अत एव ज्योतिषशास्त्रे विशिष्टयोगदानाय भोपालपरिसरस्य ज्योतिषशास्त्रविद्याशाखाप्रमुखैः प्रो. भारतभूषणमिश्रवर्यैः त्रयः विद्वांसः सम्मानिताः।



केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरे अखिलभारतीययुवमहोत्सवः २०२४ इत्यस्य उद्घाटनं मध्यप्रदेशस्य माननीयराज्यपालेन अक्तूबरमासस्य १७तमे दिनाङ्के विहितम्। अखिलभारतीययुवमहोत्सवे तू विविधस्पर्धाः आयोजिताः। आयोजितासु स्पर्धासु राजस्थान, हरियाणा, उत्तरप्रदेशः तथा च मध्यप्रदेशस्य स्पर्धालवः प्रतिभागं कृतवन्तः। क्रमेऽस्मिन्नेव करदीपशिखा (मशाल)प्रज्ज्वालनेन ध्वजारोहणेन च सह परिसरनिदेशकाः समेभ्यः प्रतिभागिभ्यः प्रतिज्ञामकारयन्। आयोज्यमानसु अखिलभारतीय-क्रीडा-सांस्कृतिक-शैक्षिक-स्पर्धासु विगतदिन-द्वये चत्वारिंशत् प्रतियोगितानां प्रथम-द्वितीय-तृतीय-पुरस्कारप्रदानेन च समापनसमारोहः सम्पन्नः। अवसरेऽस्मिन् विश्वविद्यालयस्य कुलसचिवाः प्रो. रा.गा.मुरलाकृष्णवर्यः प्रो. मदनमोहनझावर्यः, परिसरनिदेशकः प्रो.रमाकान्तपाण्डेयवर्यः, सहनिदेशकः प्रो. नीलाभतिवारीवर्यः, परिसरप्राध्यापकाः, छात्राः, स्पर्धालवः,अधिकारिणः कर्मचारिणश्च उपस्थिताः आसन्।








१२/११/२०२४ तः १४/११/२०२४ पर्यन्तं त्रिदिवसीया शिक्षाशास्त्रविद्याशाखया अनुसन्धानोपकरणनिर्माणकार्यशाला समनुष्ठिता। अस्यां कार्यशालायां विषयविशेषज्ञत्वेन सांचीबौद्ध-भारतीयज्ञान-अध्ययनविश्वविद्यालयस्य सहायकाचार्यः डॉ. प्रभाकरपाण्डेयवर्यः शिक्षाचार्यच्छात्रेभ्यः शोधच्छात्रेभ्यश्चा-नुसन्धानोपकरणानि कथं प्रयोज्यानि, प्रश्नावली कथं निर्मेया, अनुसन्धाने शैक्षिकप्रविधेः महत्त्वं किमिति सविस्तरमुदबोधयत्। प्रसङ्गेऽस्मिन् सभाध्यक्षः सहनिदेशकः प्रो.नीलाभतिवारिवर्यः अवोचत् यदनुसन्धाने प्रदत्तांशानां प्रयुक्तोपकरणानाञ्च विशिष्टं महत्त्वं भवति, अतः जागरूकतया प्रदत्तांशविश्लेषणं करणीयमिति। अस्यां कार्यशालायां शिक्षाशास्त्रविद्याशाखायाः प्राध्यापकाः, शिक्षाचार्यच्छात्राः, शोधच्छात्राश्च समुपस्थिताः आसन् ।





भोपालपरिसरे संस्कृतसाहित्यविद्याशाखया विदेशेषु संस्कृतसाहित्यं भारतीयसंस्कृतिश्चेति विषयमादाय विशिष्टव्याख्यानं समनुष्ठितम् । व्याख्यानेऽस्मिन् विशिष्टवक्तृत्वेन पोलैण्डविश्वविद्यालयस्य सहायकाचार्यः डॉ.शिवानन्दफिलिपवर्यः समुपस्थाय अगादीत् यत् विदेशेष्वपि संस्कृतसाहित्यं भारतीयसंस्कृतेश्च प्रचारः प्रसारश्च अधुना नितरां वर्धते । तत्र स्थिताः भारतीयाः इतरे च परम्परानुगुणं यथासामर्थ्यं संस्कृतसंस्कृतिसंस्काराणां संरक्षणे प्रयतन्ते ।

rawpixel

भोपालपरिसरे एकोनविंशतिः गोलमेजसत्रं ०२/१२/२०२४ तमे दिनाङ्के आयोजितम्। कार्यक्रमस्य आध्यक्षीयं परिसरस्य निदेशकः प्रो. रमाकान्तपाण्डेयवर्यः निरूढवान् । अवसरेऽस्मिन् पाण्डेयवर्यः अवोचत् यत् महाकुम्भस्य माहात्म्यं वैदिककालादेव अस्ति। ऋग्वेदस्य खिलसूक्तेऽपि महाकुम्भसम्बन्धिनी चर्चा कृता अस्ति। लोकात् परलोकं यावत् अध्यात्मजागृतिः गङ्गायमुनयोः सङ्गमादेव भवतीति। कार्यक्रमेऽस्मिन् डॉ. अमिताभपाण्डेयवर्यः, IGRMS निदेशकः, इलाहाबादविश्वविद्यालयतः मुख्यवक्तृत्वेन श्रीधनञ्जयचौपडावर्यः, प्रो. नीलाभतिवारीवर्यः अन्ये च अधिकारिणः, छात्राः, कर्मचारिणश्च उपस्थिताः आसन्।











राष्ट्रिय-अध्यापकशिक्षापरिषदः (NCTE) निर्देशानुसारं भोपालपरिसरे जेण्डर-संवेगीकरण-कार्यशाला १८/१२/२०२४तमे दिनाङ्के समायोजिता । कार्यशालायां विशिष्टवक्तृत्वेन PGBT महाविद्यालयस्य प्राचार्यः अपरसंचालकः डॉ. आर.के.स्वर्णकारवर्यः लैङ्गिकसंवेगीकरणमभिलक्ष्य वैदिकवाङ्मयादारभ्य महाभारतरामायणयोः ज्ञानेन सह भौतिकमपि ज्ञानम् आवश्यकम् इति विषयेऽस्मिन् परिसरच्छात्रान् उदबोधयत्। मुख्यातिथित्वेन मध्यप्रदेशशासनस्य अधिवक्ता श्रीमान् राजसक्सेनावर्यः छात्राणां कृते शैक्षिकाधिकाराः, न्यायाधिकाराः इति विषयमादाय सम्बोधयत्। कार्यक्रमसभाध्यक्षः प्रो. नीलाभतिवारिवर्यः आध्यक्षीयभाषणेन छात्राणां मार्गदर्शनमकरोत्।




केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरे चतुर्थजनजातीयगौरवदिवसः समनुष्ठितः। कार्यक्रमेऽस्मिन् मुख्यातिथित्वेन आरक्षकविभागस्य अधिकारी श्रीविवेकधुर्वेवर्यः समुपस्थाय जनजातीयगौरवदिवसम् (बिरसामुण्डा) अभिलक्ष्य प्रेरणादायकं व्याख्यानम् अकरोत्। अवसरेऽस्मिन् सभाध्यक्षः प्रभारीनिदेशकः प्रो. सुबोधशर्मवर्यः छात्रान् उदबोधयत्। सहनिदेशकैः प्रो.नीलाभतिवारिवर्यैः सह अन्येऽपि प्राध्यापकाः छात्राश्च समुपस्थिताः ।अनेन कार्यक्रमेण छात्राः जनजातीयसभ्यतायाः विषये ज्ञानं प्राप्तवन्तः।



भोपालपरिसरे संविधानदिवसः सगौरवं परिपालितः। अवसरेऽस्मिन् प्रभारीनिदेशकः प्रो. सुबोधशर्मवर्यः सर्वेभ्यः प्राध्यापकेभ्यः, छात्रेभ्यः, कर्मचारिभ्यश्च संविधानप्रस्तावनायाः शपथस्य वाचनम् अकारयत्। शपथग्रहणकार्यक्रमस्य संयोजनं डॉ. अर्चनाचौहानमहोदया कृतवती। संविधानमादाय कनिष्ठ-वरिष्ठछात्रेभ्यः निबन्धप्रतियोगिताऽपि समायोजिता । यत्र छात्राः सोत्साहं भागं गृहीतवन्तः। कार्यक्रमस्यास्य आयोजनेन सर्वेऽपि छात्राः संविधानं, स्वकर्तव्यादिविषये ज्ञातवन्तः।

नटाङ्कुश-अभिनयदर्पणयोः पाठः इति विषयमादाय हैमन्तीयकार्यशाला समनुष्ठिता। अस्याः कार्यशालायाः उद्घाटनसत्रस्य मुख्यातिथिः विषयविशेषज्ञश्च प्रो. राधावल्लभत्रिपाठिवर्यः नटाङ्कुशम् अधिकृत्य उद्बोधयत् यत् नटाङ्कुशः शास्त्रीयग्रन्थः तथापि नाट्यप्रयोगे अस्य महन्महत्त्वं वर्तते। ग्रन्थस्यास्य सम्पादनमपि अहम् अकरवम् अतः अस्य वैशिष्ट्यं जानामि। विशिष्टातिथिः महाराजा-सयाजीरावविश्वविद्यालयस्य नृत्यविभागस्य सहाचार्या डॉ. स्मृतिवाघेलावर्या कार्यशालायां ये अभिनयपक्षाः भविष्यन्ति तान् बोधितवती। सभाध्यक्षः परिसरनिदेशकः प्रो. रमाकान्तपाण्डेयवर्यः अवदत् यत् सर्वैरपि प्रतिभागिभिः सावधानतया अयं ग्रन्थः पठनीयः। कार्याशालायाः समापनसमारोहे मुख्यातिथित्वेन चक्रधरनाट्यकलाकेन्द्रस्य वरिष्ठगुरुः नृत्याङ्गना श्रीमती-अल्पनावाजपेयीवर्या प्रतिभागिच्छात्रान् समबोधयत् यत् अभिनयेन सह नृत्यज्ञानमपि अनिवार्यमस्ति। अनया कार्यशालया प्रतिभागिनः आधुनिककाले नाट्यस्य महत्त्वं, तस्य प्रयोगञ्च ज्ञातवन्तः।









भोपालपरिसरस्य नाट्यशास्त्राध्ययनानुसन्धानकेन्द्रेण उज्जयिन्यामखिलभारतीयकालिदाससमारोहे मृच्छकटिकम् (वसन्तसेना) इत्यस्य नाट्यप्रस्तुतिः कृता। केन्द्रप्राध्यापकः डॉ. प्रसादरमेशभिडेवर्यैः सहनाट्यशास्त्राध्ययनानुसन्धानकेन्द्रस्य प्राध्यापकाः, छात्राश्च कार्यक्रमेऽस्मिन् भागग्रहणम् अकुर्वन्। नाट्यपरिकल्पना डॉ.चन्नबसुवस्वामिहिरेमठस्य आसीत्।




श्रीरघुनाथकीर्तिपरिसरेण त्रिदिवसीय-उत्तरक्षेत्रीयाखिलयुवमहोत्सवः अक्तूबर-मासस्य २६ दिनाङ्कात् २८ दिनाङ्कपर्यन्तं समाचरितः। अस्मिन् महोत्सवे जम्मू-हरियाणा-उत्तरप्रदेश-हिमाचल-उत्तराखण्ड-राज्येभ्यः ३५० प्रतिभागिनः समागताः। उद्घाटनसत्रे माननीयः श्रीसन्तोषयादवमहोदयः, एल.पी. जोशीमहोदयः च मुख्यातिथिरूपेण समुपस्थितः। समापनसत्रे मुख्यातिथिरूपेण जनपदाधिकारी श्रीमान्-अशोकचौहानमहोदयः, केन्द्रीयसंस्कृतविश्वविद्यालयस्य परीक्षानियन्त्रणाधिकारी प्रो.पवनकुमारमहोदयः, परिसरनिदेशकः प्रो.पी.वी.बी. सुब्रह्मण्यममहोदयः च उपस्थितः आसीत्। मञ्चस्थाः अतिथयः छात्रेभ्यः पुरस्कारान् प्रदाय उत्साहवर्धनं कृतवन्तः। एतादृशायोजनेन छात्राणां शैक्षिक-सांस्कृतिक-शारीरिकविकासः च भविष्यतीति निदेशकमहोदयैः उक्तम्।



उत्तराखण्डसंस्कृत-अकादमीद्वारा खण्डस्तरे, जनपदस्तरे, राज्यस्तरे च प्रतिवर्षं प्रतियोगितानामायोजनं भवति। अस्मिन् वर्षेऽपि आयोजितासु प्रतियोगितासु श्रीरघुनाथकीर्तिपरिसरेण खण्डस्तरे सर्वास्वापि प्रतियोगितासु प्रथमं स्थानम्, जनपदस्तरे समूहनृत्य-समूहगान-संस्कृतनाटकप्रतियोगितासु प्रथमं स्थानं प्राप्य राज्यस्तरार्थं स्थानं रक्षितम्। राज्यस्तरीयप्रतियोगिताः हरिद्वारे अभवन्। तासु प्रतियोगितासु संस्कृतसमूहगानं तथा संस्कृतनाटकप्रतियोगितायां प्रथमं स्थानं प्राप्य सम्पूर्णेऽपि उत्तराखण्डराज्ये श्रीरघुनाथकीर्तिपरिसरस्य नाम प्रकाशितम्। परिसरनिदेशकाः सर्वेषाम् प्रतिभागिनाम् अभिनन्दनम् कृतवन्तः।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरेण स्वामिकरपात्रिमहाराजवेदशास्त्रानुसन्धान-केन्द्रान्तर्गतत्वेन साहित्यविभागीया पञ्चदिवसीया काव्यदोषविमर्शकार्यशाला समायोजिता। अस्याः कार्यशालायाः उद्घाटनं सोमवासरे अगस्तमासस्य ०५ दिनाङ्के प्रातः दशवादने अभवत्। आहत्य अत्र विंशतिः सत्राणि सञ्जातानि। अस्याः कार्यशालायाः सम्पूर्तिसत्रे केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरस्य साहित्यविद्याशाखायाः संयोजकाः प्रो. विजयपालशास्त्रिणः मुख्यातिथिरूपेण समुपस्थिताः, अध्यक्षरूपेण विराजमाना आसीत् साहित्यविद्याशाखायाः आचार्या प्रो.चन्द्रकला आर्. कोण्डिमहोदया। एवं स्वामिकरपात्रिमहाराजवेदशास्त्रानुसन्धान-केन्द्रान्तर्गतत्वेन साहित्यविभागीया पञ्चदिवसीया काव्यदोषविमर्शकार्यशाला सम्पन्नतामगात्।




केन्द्रीयसंस्कृविश्वविद्यालयः शैक्षिकगुणवत्तया सह सांस्कृतिक-कला-रूपकादीनां गुणवत्तावर्धने कृतसङ्कल्पः। असौ सङ्कल्पः सिद्धिम् अधिगच्छेत् इति कृत्वा विश्वविद्यालयः प्रतिवर्षं विविधाः कार्यक्रमाः समायोजयति। एषः उत्तरक्षेत्रीयरूपकमहोत्सवः सम्वत्सरस्यास्य नवम्बरमासस्य २८-२९ दिनाङ्के जम्मूस्थः श्रीरणवीरपरिसरे समायोजितः। तत्र पञ्चराज्येभ्यः परिसराः महाविद्यालयाश्च प्रतिभागित्वेन समागतासन्। तेषु अस्माकं श्रीरघुनाथकीर्त्तिपरिसरः उत्साहेन रूपकेऽस्मिन् भागम् अग्रहीत्। अत्यन्तश्रमेण प्रत्यहम् अभ्यासरतासन् इमे सर्वेऽपि नटाः। परिसरस्य निदेशकानाम् आचार्याणां पी.वी. बी. सुब्रह्मण्यमवर्याणां आशीषेण साहित्यविद्याशाखायाः आचार्यशैलेन्द्रनारायणकोटियालवर्याणां संयोजकत्वे, ज्योतिषविद्याशाखायाः प्राध्यापकः श्रीरजतगौतमछेत्रीणां मार्गदर्शने च परिसरस्य नटदलं २६-११-२०२४ तमे दिनाङ्के परिसराद् रूपकमञ्चयितुं जम्मूम् अगच्छन्। प्रो. राधावल्लभत्रिपाठिभिः विरचितं 'मशकधानी' इति नामकं प्रेक्षणात्मकं रूपकं परिसरस्य नटदलैः प्रदर्शितम्। नाट्यनिर्देशकस्य श्रीविनोदशर्मणः निर्देशने रूपकमिदं नाटितम्। द्वितीयपुरस्कारेण विभूषितः श्रीरघुनाथकीर्त्तिपरिसरः सदा दीव्येरन्। अस्मिन् रूपके विंशतिः छात्राः अभिनयम् कृतवन्तः।

अक्तूबरमासस्य १७ तः १९ दिनाङ्कं यावत् भोपालपरिसरे आयोजिते क्षेत्रीययुवमहोत्सवे जयपुरपरिसरच्छात्रैः १७ स्वर्णपदकानि ८ रजतपदकानि २ कांस्यपदकानि च प्राप्य विजयवैजयन्तीं प्राप्तवन्तः। स्पर्धालवः विश्वविद्यालयस्य,परिसरस्य कीर्तिम् अवर्धन्त।







दिसम्बरमासस्य अष्टाविंशतितः एकोनविंशतिदिनाङ्क-पर्यन्तं जयपुरपरिसरे 'लिविङ्ग वेदां' श्रीअरविन्दस्य विशिष्टालोके इत्याख्या अन्ताराष्ट्रिया सङ्गोष्ठी महता वैभवेन समायोजिता।




एकादशदिनाङ्के भारतीयभाषामहोत्सवे विविधासु भाषासु कार्यक्रमाः आयोजिताः। पूर्वोत्तरदक्षिण-पश्चिमभारतशाखायाः व्यञ्जनानि च छात्रैः निर्मितानि। एतेन छात्रेषु विविधतायाम् एकता इति भावनायाः विकास अभवत् अन्यच्च विविधव्यञ्जनानां निर्माण-प्रक्रियामपि ज्ञातवन्तः।



केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरे एकोनत्रिशंत् दिनाङ्के आई.सी.टी कार्यशालायाः आयोजनमभूत्। सूचना तथा जनसंचारप्रौद्यौगिकी कार्यशालायाः संयोजकौ प्रो. लीनासक्करवालः डॉ. डम्बरूधरपतिश्च आस्ताम्। अनया कार्यशालया छात्राः प्रौद्यौगिक्याः सम्यगुपयोगं ज्ञातवन्तः।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य राजस्थान प्रदेशस्थ जयपुरपरिसरे संविधानदिवसमुपलक्ष्य टॉकशो इत्यस्य आयोजनम् कृतम्। कार्यक्रमस्य मुख्यातिथिः पूर्वजिलान्यायाधीशः माननीयः अशोककुमारव्यासः विशिष्टातिथिः प्रो. संजुलाथानवी च आस्ताम्। कार्यक्रमेऽस्मिन् परिसरीय प्राध्यापकाः, छात्राः, कर्मचारिणश्च उपस्थिताः आसन्।







केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरे १४ नवंबर दिनाङ्के जनजातीयगौरवदिवसस्य आयोजनम् अभवत्। परिसरस्य माननीयसहनिदेशकाः कार्यक्रमस्य आध्यक्षम् निर्व्यूढवन्तः। कार्यक्रमेऽस्मिन् एस.एम. एस चिकित्सालयस्य आचार्याः प्रो धीरज जेफ महोदयाः राष्ट्रीयमन्त्री ए.बी.वी.पी श्री राहुलराणा,एबीवीपीसंगठनमन्त्रीप्रभृतयः गणमान्यविभूतयः उपस्थिताः आसन्।





दिसम्बरमासस्य द्वाविशंतिदिनाङ्कतः अष्टाविशंतिदिनाङ्कं यावत् नाट्यलेखनकौशलकार्यशालायाः आयोजनं साहित्यविद्याशाखया सम्पादितम्। अस्यां कार्यशालायां कुलपतिः आचार्यः श्रीनिवासवरखेडीवर्यः विदुषां सभाजितवान्। अनया कार्यशालया युवच्छात्राः नाट्यलेखन कौशलं, परम्परां च ज्ञातवन्तः।






०१/०७/२०२४ तमे दिनाङ्के लखनऊपरिसरे पञ्चदिवसीयकार्यशाला ('वी-लागइति' विषयिणी) समपद्यत। यस्याः उद्घाटनं दीपप्रज्वालनपूर्वकं वैदिकमङ्गलाचरणेन समभवत्। अमृताकौरवर्या कार्यशालायाः विषयं प्रास्तावीत्। अध्यक्षीयमुद्बोधनं विदधानः परिसरनिदेशकः प्रो.सर्वनारायणझावर्यः। कार्यशालायां प्रसिद्धः पटकथालेखकः श्रीसूरसिंहमहोदयः, शीर्षतकनीकिक्षेत्रस्य, मीडियाविभागस्य च कुशलाः श्रीसत्यपालसिंहमहोदयाः, प्रसिद्धः पटकथालेखकः श्रीदिनेशयादवमहोदयः, डॉ. नारायणदत्तमिश्रवर्यः, श्रीसत्यपालसिंहमहोदयः च उपस्थितः। अस्याः कार्यशालायाः आयोजनेन विश्वविद्यालयस्य विविधपरिसरीयचिताः छात्राः लाभान्विताः अभवन्।




१२ सितम्बर २०२४ तमे दिनाङ्के केन्द्रीयसंस्कृतविश्वविद्यालयस्य माननीयानां कुलपतीनां प्रो. श्रीनिवासवरखेडीमहोदयानां तथा च परिसरस्य निदेशकानां प्रो. सर्वनारायणझावर्याणां प्रकल्पस्य पूर्णताहेतोः परिसरीयाः छात्राः चिताः ते च 'एच.सी.एल. टेक कैरियर उद्योग समर्थित इन्टर्नशिप ओरिएन्टेशन' कार्यक्रमे भागं गृहीतवन्तः। लखनऊनगरे स्थितायाः एच.सी. एल. टेक नामकसंस्थायाः मर्मज्ञैः छात्राणां टेक्नोलाजी कोर्स इति विषये उक्तं यत् कथं तकनीकिविषयम् अङ्गीकृत्य नूतनानि कार्याणि छात्रैः कर्तुं शक्यते। अनेन माध्यमेन धनोपार्जनमपि कर्तुं शक्यते। 'एच.सी.एल टेक' इति संस्थायां लखनऊपरिसरस्य निदेशकाः प्रो. सर्वनारायणझामहोदयाः सर्वान् छात्रान् सम्बोधयन्तोवादिषुर्यद् भारतीयज्ञानपरम्परायाः प्रचारे आधुनिकतकनीकेः अत्यधिकावश्यकता वर्तते, प्रतिष्ठा यशः इत्यादिकं सर्वमनेन सेत्स्यतीत्यादिविषयान् सूक्ष्मान् न्यरूपयन्। तत्र छात्राः अपि विषयगाम्भीर्यं विज्ञाय स्वानुभवान् प्राकटन्। अवसरेऽस्मिन् सहनिदेशकाः प्रो. गुरुचरसिंहनेगीवर्याः, परिसरनिदेशकः प्रो. सर्वनारायणझावर्याः, अन्ये परिसरीयाः सभ्याश्च उपस्थिताः आसन्।




उत्तरप्रदेशस्थिते लखनऊपरिसरे २७२६५ संख्याके इग्नू अध्ययनकेन्द्रे 'इण्टक्सन' कार्यक्रमः समायोजि। सहनिदेशकेन प्रो. गुरुचरणसिंहनेगीवर्येण प्रास्ताविकं प्रस्तुवता प्रत्ययादि यत् के.सं.वि.वि. लखनऊपरिसरे संस्कृतसम्बन्धिनः षट् कार्यक्रमाः समारब्धाः विद्यन्ते। कार्यक्रमेऽस्मिन् संयोजकः डॉ. प्रफुल्लगडपालवर्यः, इग्नूसंस्थायाः वरिष्ठा क्षेत्रीयनिदेशिका प्रो. मनोरमासिंहमहोदया, इग्नूसंस्थायाः अन्येऽधिकारिणश्च उपस्थिताः आसन्।



लखनऊपरिसरेण अष्टसप्ततितमः स्वतन्त्रतादिवसः समाचरितः। ध्वजारोहणं मुख्यभवनस्य पुरो लघुवाटिकायां प्रातः सार्धसप्तवादने परिसरस्य निदेशकेन प्रो. सर्वनारायणझामहोदयेन विहितम्। यस्मिन् परिसरस्य समे प्राध्यापकाः, छात्राः समेऽपि कर्मचारिणश्चोपस्थिताः आसन्। अवसरेऽस्मिन् प्रो.भारतभूषणत्रिपाठिवर्यः, प्रो. अवनीश अग्रवालवर्या, प्रो. मदनमोहनपाठकवर्यः अन्ये च तत्सहयोगिनः उपस्थिताः आसन्।

४ सितम्बरतः १९ सितम्बर २०२४ पर्यन्तं स्वच्छतापक्षताकार्यक्रमः सम्पन्नः। यस्य उद्घाटनसत्रं परिसरस्य निदेशकानां प्रो.सर्वनारायणझावर्याणाम् अध्यक्षत्वे सम्पन्नम्। कार्यक्रमस्य शुभारम्भः वैदिकेन लौकिकेन च मङ्गलाचरणेन जातः। सञ्चालनं डा. शिवानन्दमिश्रेण तथा च धन्यवादज्ञापनं डा. रुद्रनारायणनरसिंहमिश्रेण च सम्पादितम्। अत्र सन्ति प्रो. गणेशशङ्करविद्यार्थिनः, प्रो. लोकमान्यमिश्राः, प्रो. मदनमोहनपाठकाः, प्रो. भारतभूषणत्रिपाठिनश्च। स्वच्छतापक्षतायाः अन्तर्गते अपराह्णे पञ्चवादने परिसरे वृक्षारोपणस्य कार्यक्रमः माननीयानां श्रीमतां निदेशकवर्याणां निर्देशने समपद्यत। चित्रे सन्ति परिसराः अध्यापकाः छात्राश्च।




केन्द्रीयसंस्कृतविश्वविद्यालये लखनऊपरिसरे बिरसामुण्डा इति महापुरुषजयन्तीमुपलक्ष्य "जनजातीयगौरवदिवसः" सोत्साहं समनुष्ठितः। यथाक्रमं वामतः सन्ति डॉ. प्रफुल्लगडपालमहोदयाः, प्रो.गुरुचरणसिंहनेगीवर्याः, प्रो. सर्वनारायणझावर्याः, प्रो. पवनदीक्षितवर्याः, डॉ. कृष्णानेगीवर्या च।



लखनऊपरिसरे नेपालविद्वत्समेता शताधिकभारतीयज्यौतिषकमहिता आन्तर्जालिकी सभा अभवत्। सदस्याः अस्याः भारतीयपञ्चाङ्गपरम्परां धर्मशास्त्रीयसिद्धान्तांश्च कुलङ्कषं निभाल्य निर्णयोऽयम् अकरोत् यत् ३१ अक्तूबर २०२४ दिनाङ्के एव दीपावली लक्ष्मीपूजनञ्च शास्त्रसाम्मत्यमावहतीति। चित्रे सन्ति दक्षिणतः कार्यक्रमाध्यक्षाः परिसरनिदेशकाः प्रो. सर्वनारायणझावर्याः, प्रो.भारतभूषणत्रिपाठिनः वामतः प्रो. मदनमोहनपाठकाः, प्रो. धनीन्द्रकुमारझाः, डॉ. नीरजतिवारी च।







केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊपरिसरद्वारा संस्कृतदिवसमुपलक्ष्य लखनऊस्थित विद्यालयेषु विविधकार्यक्रमाः आयोजिताः। १६ अगस्त २०२४ इति दिनाङ्के इण्डियन पब्लिक विद्यालये गोमतीनगरे प्रो. देवीप्रसादद्विवेदिमहोदयेन संस्कृतदिवसकार्यक्रमस्य विजेतृणां कृते पुरस्कारप्रदानपुरस्सरं सम्पन्नता विहिता। एवमेव एस.एम. पब्लिकविद्यालये, ग्वारी गोमतीनगरे प्रो. अवनीश अग्रवालमहोदयानां निर्देशने संस्कृतदिवसस्य कार्यक्रमः सम्पन्नताम् अगच्छत्।







केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊपरिसरे 'फिट-इण्डिया' इत्यनुरूपं क्रीडाकार्यक्रमाः समपद्यन्त। तत्र छात्राः कबड्डी, बैडमिण्टन, क्रिकेट इत्यादि क्रीडासु स्वीयं कौशलं प्रदर्शितवन्तः।




केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊपरिसरः चिकित्साक्षेत्रे आयुर्वेदाध्ययनं कारयिष्यति। असाध्याः अपि रोगाः आयुर्वेदेन सुसाध्याः भवन्ति अस्मात् आयुर्वेदाध्ययनं नितान्तमुपयोगी। आयुर्वेदग्रन्थाः संस्कृते एव सन्ति अतः विश्वविद्यालये संस्कृतेन सह आयुर्वेदस्य गभीरमध्ययनं भविष्यति।




विश्वविद्यालयस्य लखनऊपरिसरे महता वैभवेन हिन्दीदिवसः समाचरितः। कार्यक्रमेऽस्मिन् परिसरनिदेशकः प्रो. सर्वनारायणझावर्यः, डा. सन्ध्यात्रिपाठिवर्या, डा. धर्मेन्द्रपाठकवर्यः, डा. शिवानन्दमिश्रवर्यः अन्ये च विद्वांसः उपस्थिताः आसन्।

०२/१०/२०२४ तमे दिनांके महात्मागान्धिनः जन्मदिवसमुपलक्ष्य लखनऊपरिसरे स्वच्छता-अभियानकार्यक्रमः सञ्जातः। तस्मिन् कार्यक्रमे परिसरस्य-अध्यापकाः कर्मचारिणः छात्राश्च भागं गृहीत्वा परिसरस्य स्वच्छतायै योगदानं कृतम्।





२८-२९ नवम्बर दिनाङ्कयोः जम्मूपरिसरे आयोजिते उत्तरक्षेत्रीयरूपकमहोत्सवे छात्रैः "युत्थिका" इति नाटकं प्रदर्शितम्। तेन प्रथमपुरस्कारोऽपि प्राप्तः।



केन्द्रीयसंस्कृतविश्वविद्यालयस्य वेदव्यासपरिसरे गान्धिजयन्ती इत्यस्मिन् दिवसे राष्ट्रियसेवायोजनायाः संयुक्ततत्त्वावधाने स्वच्छताभियानम् आयोजितम्। कार्यक्रमोऽयं परिसरनिदेशकस्य प्रो. सत्यमकुमारी-महोदयायाः अध्यक्षतायां सम्पन्नः। अस्य संयोजकः पंकजः सहसंयोजकः अमितवालिया च आसीत्।



१९-२०/१०/२०२४ दिनांकयोः वेदव्यासपरिसरे ठाकुररामसिंहेतिहासशोधसंस्थानम्, नेरी, हमीरपुरम् इत्यनयोः संयुक्ततत्त्वावधाने द्वि-दिवसीया राष्ट्रियसंगोष्ठी आयोजिताभूत्। अस्याः विषयः भारतीयज्ञानपरम्परायां हिमाचलस्यावदानम् आसीत्। अत्र अध्यक्षः परिसरस्य प्र.निदेशकः डॉ. श्यामबाबू, मुख्यातिथिः हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयस्य निदेशकः प्रो. भागचंदचौहान, विशिष्टातिथिः हिमाचलप्रदेशकेन्द्रीय -विश्वविद्यालयस्य सप्तसिंधुपरिसरस्य डॉ. किस्मतकुमारः, ठाकुर-राम-सिंह-इतिहास- शोध-संस्थानस्य निदेशकः चेतरामगर्गः, संयोजकः डॉ. मुकेशशर्मा च आसन्।

२१.१०.२४ दिनाङ्के ज्योतिषविद्याशाखायाः आचार्यप्रथमवर्षीयैः छात्रैः परियोजनाकार्यान्तर्गतं सम्राट्-यन्त्रं निर्मितम्।






२६.१०.२४ दिनाङ्कतः २८.१०.२४ दिनाङ्कपर्यन्तं श्रीरघुनाथकीर्तिपरिसरे देवप्रयागे आयोजितायाम् उत्तरक्षेत्रीय-क्रीडा-सांस्कृतिक-शैक्षिक-स्पर्धायाम् वेदव्यासपरिसरस्य छात्राः विजयवैजयन्ती प्राप्ता।



हिमाचलसंस्कृताकदमीपक्षतः राजकीयसंस्कृतमहाविद्यालये नाहने राज्यस्तरीया संस्कृतप्रतियोगिता आयोजिताभूत्। तत्र वेदव्यासपरिसरेण चत्वारः पुरस्काराः प्राप्ताः। सद्योभाषणे टेकचन्द्रः प्रथमः गीतगाने ध्रुवकौशलः प्रथमः प्रश्नोत्तरस्पर्धायां द्वितीयः सूत्रान्त्याक्षरस्पर्धायां सान्त्वना पुरस्कारश्च प्राप्तः।





केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरणवीरपरिसरे “मानवजीवन में प्राकृतिक स्वास्थ्य की उपादेयता” इति विषयकमेकं व्याख्यानमभवत्। तत्र वैद्यश्रीराजेशकपूरमहोदयैः विशिष्टं व्याख्यानं प्रदत्तम्। मानवजीवने प्राकृतिकप्रदत्तस्य आयुर्वेदस्य कथमुपयोगिता वर्तते। प्राकृतिकचिकित्सा वर्तमानसमये कथं समाजमुपकर्तुं शक्यते इति वैधमहोदयैः प्रतिपादितम् ।

केन्द्रीयसंस्कृतविश्वविद्यालयः, शेर-ए-कश्मीरकृषिविश्वविद्यालयः, जम्मूविश्वविद्यालयः, इत्येतेषां संयुक्ततत्त्वावधाने श्रीरणवीरपरिसरे राष्ट्रियवेदविज्ञानसम्मेलनस्यायोजनम् अभवत्। समायोजितस्यास्य सम्मेलनस्य उद्घाटनं महामहिम उपराज्यपालः श्री मनोजसिन्हामहोदयेन कृतम्। अन्यप्रमुखविशिष्ट जनेषु पद्मश्री प्रो. विश्वमूर्तिशास्त्री, शेर-ए-कश्मीरकृषिविश्वविद्यालयस्य कुलपतिः, प्रो. रानीसदाशिवमूर्तिः कुलपतिः श्री वेङ्कटेशवैदिकविश्वविद्यालयः, प्रो. बी.एन.त्रिपाठी उपस्थितः आसीत्। उद्घाटनसत्रे राज्यपालमहोदयैः उक्तं यत् वेदाः एव सम्पूर्णविश्वस्य पोषकाः सन्ति सम्प्रतिः अशान्तिदुःखेन सदातुरस्य विश्वस्य दुःखं निवारयितुं वेदप्रतिपादितस्य धर्ममार्गस्य, शिक्षामार्गस्य एव उपादेयता वर्तते। पद्मश्री प्रो. विश्वमूर्तिशास्त्रिमहोदयैः उक्तं यत् वैदिकशिक्षानीतेः ज्ञानं साम्प्रतिके समाजे प्रसारयामश्चेद् समाजे एतादृशी अराजकता अस्थिरता च न भवेत्। अतः वेदमाधारीकृत्यैव मानवसमाजस्य परिकल्पनां कर्तुं शक्यते। कार्यक्रमस्याध्यक्षाः परिसरनिदेशकाः प्रो. श्रीधरमिश्रमहोदयाः आसन्।






२६/११/२०२४ दिनाङ्के श्रीरणवीरपरिसरे संविधानदिवसश्च संयुक्तरूपेण समनुष्ठितः। परिसरनिदेशकैः प्रो. श्रीधरमिश्रवर्यैः संविधानदिवसमुपलक्ष्य आदौ भारतस्य संविधानं साक्षीरूपेण संस्मर्य अध्यापकान् छात्रान् कर्मचारिवृन्ताश्च शापथमप्यकारि। तदनु परिसरस्य वाणीविलाससभागारे संविधानविषये चर्चा सत्रं जातम्। स्वतन्त्रता-सेनानी बिरसामुण्डो महोदयस्य जन्मदिनमुपलक्ष्य जनजातिगौरव-दिवसोऽपि आयोजितः तत्र जनजातिनृत्यं विविधाः प्रतियोगिताश्च अभवन्। तासु च छात्रैरुत्साहपूर्वकं भागग्रहणमपि कृतम् ।




नवम्बरमासस्य २८-२९ दिनांकयोः श्रीरणवीरपरिसरस्य नेतृत्वे उत्तरक्षेत्रीयरूपक-महोत्सवस्यायोजनमभवत्। केन्द्रीयसंस्कृतविश्वविद्यालयस्य सम्बद्धाः परिसराः, महाविद्यालयाः, हरियाणाकैथलस्थ वाल्मीकिसंस्कृतविश्वविद्यालयः च तत्र प्रतिनिधिरूपेण आसन्। एताः सर्वाः शिक्षणसंस्थाः जम्मूनगरे आगत्य स्वकीयरूपकस्य प्रस्तुतिः कृताः। रूपकमहोत्सवस्य उद्घाटनसमारोहे भारतेषु लब्धप्रतिष्ठाः विद्वांसः प्रशासकाः कलामर्मज्ञाश्च आमन्त्रिताः आसन् तेषु श्री आनन्दजैनः वरिष्ठपुलिसउपायुक्तः विशिष्टातिथिः, प्रो. कमला भारद्वाजः पूर्वसंकायप्रमुखा एवं विभागाध्यक्षा श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली, मुख्यातिथिः प्रो. सत्यम् कुमारी, निदेशिका केन्द्रीयसंस्कृतविश्वविद्यालयः श्रीवेदव्यासपरिसरः, हिमाचलप्रदेशः, प्रो. सतीशकुमारकपूर सहनिदेशकः, प्रो. श्रीधरमिश्रः निदेशकः केन्द्रीयसंस्कृतविश्वविद्यालयः श्रीरणवीरपरिसरः, जम्मू, अध्यक्षः। अस्योद्घाटनसत्रस्य संचालकः डॉ. हरिशंकरपाण्डेयेन, स्वागतभाषणं प्रो. सतीशकुमारकपूर धन्यवादज्ञापनञ्च डॉ. तेजनाथपौडेलेन कृतम्। महोत्सवस्य प्रथमदिने षण्णाम् रूपकाणां प्रस्तुतिः जाता। उत्तरक्षेत्रीयरूपकमहोत्सवस्य सम्पन्नतासमारोहेऽस्मिन् विशिष्टातिथिरूपेण जम्मूकश्मीरराज्यस्य प्रशासनिकाधिकारिणः(IPS) श्रीशक्तिपाठकमहोदयाः आसन्। मुख्यातिथित्वेन जम्मूकश्मीरराज्यस्य माननीयविधायकाः श्रीशामलालशर्ममहोदयाः तथा सारस्वतातिथिरूपेण 'नवभारतटाईम्स' इति राष्ट्रियसमाचारपत्रस्य पूर्वसम्पादकाः श्री राजेन्द्रभारद्वाजमहोदयाः समुपस्थिताः आसन्। कार्यक्रमे प्रथमद्वितीय तृतीय पुरस्कारैः सभाजितानां परिसराणां महाविद्यालयानाम् अतिथीनां करकमलैः पुरस्कार-वितरणमप्यभवत्। उत्कृष्टः अभिनयकारणात् सर्वोत्कृष्ट पुरस्कारेण छात्राणामपि उत्साहवर्धनार्थं पुरस्कारप्रदानम् अभवत्। कार्यक्रमस्य आध्यक्ष्यं परिसरनिदेशकैः प्रो. श्रीधरमिश्रमहोदयैः निरवरत। कार्यक्रमस्य संचालनं डॉ. तेजनाथपौडेलमहोदयैः कृतम् ।





अक्तूबरमासस्य प्रथमे दिनाङ्के श्रीसदाशिवपरिसरे स्वच्छतापक्षस्य आचरणम् अभवत्। तदभिलक्ष्य परिसरेऽस्मिन् व्याख्यानद्वयम् आयोजितम्। ययोः विषयः आसीत् तन्त्रसम्बद्धसुरक्षा, महिलासशक्तिकरणं च। अस्मिन् कार्यक्रमे तत्तत्क्षेत्रस्य अनुभविविदुषां मार्गदर्शनं छात्रैः प्राप्तः। परिसरनिदेशकस्य प्रो. बनमालिबिश्वालमहोदयस्य आध्यक्ष्ये राष्ट्रियसेवायोजनायाः संयोजकस्य डॉ.ओमनारायणमिश्रस्य संयोजनायां कार्यक्रमोऽयं सफलताम् प्राप्तवान्।

अक्टूबरमासस्य २२-२३ दिनाङ्कयोः धर्मशास्त्रविद्याशाखायाः तत्त्वावधाने द्विदिवसीया राष्ट्रियासङ्गोष्ठी समायोजिता। यस्याः विषयः आसीत् "धर्मशास्त्रे वैज्ञानिकतत्त्वानि" इति। अस्याः सङ्गोष्ठ्याः आध्यक्ष्यम् अवहत् परिसरस्य निदेशकः प्रो. बनमालिबिश्वालः। धर्मशास्त्रविभागीयः अध्यापकः डॉ. प्रकाशकुमारशतपथी वेदमन्त्रैः मङ्गलाचरणं व्यदधात्। विभागाध्यक्षः प्रो.ललितकुमारसाहूः अतिथीनां स्वागतम् अकरोत्। उद्घाटनभाषणम् अकरोत् प्रो. वाचस्पतित्रिपाठी। उद्घाटनकार्यक्रमे मुख्यवक्तृरूपेण उपस्थितः आसीत् पूर्वतननिदेशकः प्रो. अतुलकुमारनन्दः। अस्यां सङ्गोष्ठ्यां विद्वद्भिः धर्मशास्त्राणां नैकेषु स्थानेषु वर्णितानां वैज्ञानिकतत्त्वानां प्रतिपादनं कृतम्।




अक्तूबरमासे सञ्जाते पूजावकाशे संस्कृतभाषायां धाराप्रवाहतया सम्भाषणसामर्थ्यं सम्पादयितुम् अस्मत्परिसरतः २८ छात्राः श्रीरमाकान्तसा इत्यस्य तत्त्वावधानेन संवादशालां देहलीं गतवन्तः। तत्र आवासीयं भाषाशिक्षणवर्गं कृत्वा सरलमानकसंस्कृतेन सम्भाषणकौशलं प्राप्तवन्तः। यद् द्वारा कक्ष्यासु संस्कृतमयं वातावरणं सृष्टम् एभिः छात्रैः। अधुना कक्ष्यायां प्राक्शास्त्रि छात्राः संस्कृतेन सम्भाषणं कर्तुं समर्थाः सन्ति।



त्रिदिवसीयस्य चतुर्दशयुवमहोत्सवस्य-२०२४ उद्घाटनं केन्द्रीयसंस्कृतविश्वविद्यालये श्रीसदाशिवपरिसरस्य पुरीनगरे अतिथिभिः दीपप्रज्वालनेन वैदिकमङ्गलाचरणेन कार्यक्रमस्य आरम्भः कृतः। प्रारम्भे स्वागतभाषणं परिसरस्य वरिष्ठाध्यापकः प्रो. ललितकुमार साहुवर्येण दत्तः। मुख्यातिथिः पुरीस्थः माननीयविधायकः श्रीसुनीलकुमारमोहन्ती एवञ्च विशिष्टातिथिः प्रख्यातशिक्षाविद् श्री दुर्गाप्रसाददासमहापात्रवर्यः युवसमाजाय देशभक्तिभावनायै जागरूकान् कर्तुं आह्वानमकुर्वन्। कार्यक्रमस्य राष्ट्रियसंयोजकः प्रो. मदनमोहनझावर्याः, क्षेत्रीयसमन्वयकः प्रो. विश्वरंजनपतिवर्याः, संयुक्तसमन्वयकः डॉ. गौतमकुमारचौधरिवर्यश्च आसन्। परिसरस्य सहनिदेशकः प्रो. विजयपालकछवाहवर्येण धन्यवादज्ञापनं कार्यक्रमस्य संचालनं प्रो. सुशांत कुमारराजवर्यः श्रीमान् विश्वनाथमिश्रमहोदयेन च कृतम्। अस्मिन् कार्यक्रमे परिसरस्य सर्वे छात्राः, शिक्षकाः, कर्मचारिणश्च च भागं गृहीतवन्तः। विदितम् यत् अस्मिन् त्रिदिवसीययुवमहोत्सवे-२०२४ केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीसदाशिवपरिसरः, पुरी, एकलव्यपरिसरः अगरतला, जगदीशनारायणब्रह्मचारी आदर्शसंस्कृतमहाविद्यालयः दरभंगा, लक्ष्मीदेवीसराफ-आदर्श-संस्कृतमहाविद्यालयः झारखण्डः, श्रीस्वामी प्राणकृष्णाचार्य-आदर्शसंस्कृतमहाविद्यालयः, बिहारः, श्रीसीतारामवैदिकआदर्शसंस्कृतमहाविद्यालयः, कोलकाता, कालियाचक विक्रमकिशोर आदर्शसंस्कृतमहाविद्यालयः, पूर्वमेदिनीपुरम्, श्रीरामसुन्दरसंस्कृतविश्वविद्याआदर्शसंस्थानम्, बिहारः, डॉ. रामजीमेहतासंस्कृतमहाविद्यालयः, मुजफ्फरपुरम्, श्रीराधामाधव आदर्शसंस्कृतमहाविद्यालयः, मणिपुरम्, राजकुमारीगणेशशर्मासंस्कृतमहाविद्यालयः, दरभंगा तः आगच्छन्तः। प्रायः ३०० प्रतियोगिनः धावनम्, वॉलीबॉल, कबड्डी, कुश्ती, खो-खो, शतरंज, योगः, अनुवाद इत्यादिषु विभिन्नासु क्रीडाप्रतियोगितासु भागमगृह्णन्। संस्कृतपाठलेखनम्, सङ्गणकज्ञानपरीक्षा, संस्कृतलघुचलचित्रम्, रङ्गवल्ली, संस्कृतब्लॉग, एकलसंगीतम्, समूहसंगीतम्, समूहनृत्य इत्यादिषु साहित्यिकसांस्कृतिकप्रतियोगितासु भागं गृहीत्वा स्वप्रतिभां प्रदर्शितवन्तः। चतुर्दशयुवमहोत्सवः(चतुर्थवलयः) २०२४ इत्यस्य समारोपः १६ नवम्बर २०२४ दिनाङ्के ओडिशाशासनस्य माननीयमन्त्री एवं माननीयसांसदः (पुरी) डॉ. संबितपात्रावर्यस्य आतिथ्ये डॉ. मुकेशमहालिंगस्य च शोभावर्धनेन महता वैभवेन समारब्धः। एतदतिरिच्य अन्ये बहवः गणमान्यजनाः अपि स्वस्य सान्निध्येन अवसरं गौरवपूर्णं कृतवन्तः। एकलव्यपरिसरस्यच्छात्राः विजयवैजयन्तीं प्राप्तवन्तः। सदाशिवपरीसरच्छात्राः द्वितीयस्थानमलमकुर्वन् इति दिक्।




नवम्बरमासस्य एकादशदिनाङ्के एकलव्यपरिसरे राष्ट्रियशिक्षादिवससमारोहः समायोजितः। यत्र परिसरस्य निदेशकः राष्ट्रियशिक्षादिवसस्य महत्त्वं स्मारितवान्।




नवम्बरमासस्य अष्टादशदिनाङ्कतः षड्विंशतिदिनाङ्कपर्यन्तम् एकलव्यपरिसरे जनजातीयगौरवसप्ताहः परिपालितः। तत्र विविधानां गतिविधि-सांस्कृतिककार्यक्रम-व्याख्यान-प्रदर्शन्यादीनाम् आयोजनं कृतम्। विशेषतया त्रिपुरायाः जनजातीयशाकं 'मोई मुन्तिई' इत्यस्य सहभोजनमुल्लेखयोग्यं भवति। अस्य कार्यक्रमस्य सम्पूर्तिसत्रे त्रिपुरास्थस्य स्वामिविवेकानन्दमहाविद्यालयस्य प्राध्यापकः डा. सिहंङ्कराक्सन्ताजमातीया पूर्वोत्तरभारतीय-जनजातीय-महपुरूषाणामवदानमुपस्थापितवान्।




नवम्बरमासस्य एकोनत्रिंशत्तमेदिनाङ्के अगरतलानगरे 'District Level RED RUN (Marathon)' इत्यस्य धावनप्रतियोगितायाः आयोजनमभूत्। तत्र एकलव्यपरिसरस्य विंशतिः छात्राः भागं गृहीन्वन्तः। तेषु दशविद्यार्थिनः 'State Level Marathon' इत्यस्मिन् चिताः।




एकलव्यपरिसरे Special Campaign-4.0, भारतसर्वकारतः प्राप्तानां सप्तबिन्दूनामनुपालनक्रमे 'Awareness On Cyber Security' इति विषयोपरि एकं ज्ञानसत्रं एकलव्यपरिसरस्य निदेशकस्य प्रो. प्रभातकुमारमहापात्रस्य आध्यक्ष्येण समायोजितम्। तेन च सह ऑनलाईनमाध्यमेन 'Women Led Development and Policy Implementation' इत्यस्मिन् विषये व्याख्यानमपि आयोजितम्। तेनैव भारतसर्वकारनिर्देशितः सतर्कता-जागरूकता-सप्ताह-कार्यक्रमः प्रराब्धः। यस्य समापनं ०३/११/२०२४ तमे दिनाङ्के अभूत्।





केन्द्रीयसंस्कृतविश्वविद्यालयद्वारा आयोजिते चतुर्दशे क्षेत्रीययुवमहोत्सवे एकलव्यपरिसरस्य विद्यार्थिनः विविधासु प्रतियोगितासु प्रतिभां प्रदर्श्य विजयवैजयन्तीमलभन्। तत्र ते सप्तदश स्वर्णपदकानि, अष्टौ रजतपदकानि अपि च एकं कांस्यपदकं प्राप्तवन्तः।

Mastering Your Career: Developing MOOC Courses इत्येका पञ्चदिनात्मिका कार्यशाला गुरुवायूर्-परिसरस्य सभागृहे संयोजिकया आङ्गलविभागाध्यक्षया डा.एम्.के.षीबामहोदयया समायोजिता आसीत्। अशीत्यधिकाः भागग्राहिणः MOOCs निर्माणविषये ज्ञानं तत्रावश्यककौशलानां वर्धनाय उत्तमसामग्रीणां विषये प्रायोगिकज्ञानम् समार्जयन्। अस्मिन् कार्यक्रमे कालिकट्-विश्वविद्यालयस्य वडक्कञ्चेरीनगरस्थस्य श्री व्यास एन् एस् एस् महाविद्यालयस्य आङ्लविभागस्य संयुक्ताचार्यः तथा अभिषद्-सदस्यः डा.प्रदीपकुमार्.के-महोदयः, त्रिश्शूर्-नगरस्थस्य विमलामहाविद्यालयस्य आङ्गलविभागस्य सहायकाचार्या संशोधननिरीक्षिका डा.मल्लिका.ए.नायर्-महोदया, पालक्काड्-जनपदस्य मर्सीमहाविद्यालयस्य आचार्य-संशोधनविभागस्य सहायकाचार्या डा.सी.जी.श्यामलामहोदया केन्द्रीयसंस्कृतविश्वविद्यालयस्य नासिकपरिसरस्य आङ्गलविभागस्थ सहायकाचार्यः श्री.अजित्.के-महोदयः च विशिष्टप्रशिक्षकाः आसन्।








ITEP आवासीयसंस्कृतशिबिरप्रशिक्षणवर्गः गुरुवायूर्-परिसरे सञ्चालितः। दीक्षारम्भकार्यक्रमे डा. प. नन्दकुमारवर्यैः 'अद्भुतं संस्कृतम्' इत्यस्मिन् विषये भाषणं कृतम्। तस्मिन् कार्यक्रमे मार्गदर्शकाः परिसरस्य निदेशकवर्याः, अध्यक्षाः प्रो. के. के. हर्षकुमारवर्याश्च आसन्। विशिष्टानां कृते भाषणं, क्रीडाः, योगाभ्यासः इत्यादयः छात्रेभ्यः पठनाय उत्साहः सिद्धतां च प्रायच्छन्।




नवदेहलीस्थ-केन्द्रीयसंस्कृतविश्वविद्यालयस्य आर्थिकसहयोगेन विश्वसंस्कृतप्रतिष्ठानं संस्कृतभारती केरलम् द्वारा शलाकापरीक्षा आयोजिता। यत्र निर्णायकरूपेण साहित्य-व्याकरणयोः अध्यक्षाः प्रो.ई. आर्.नारायणन् अपि आसन्।






नासिकपरिसरे नवागतानां छात्राणां कृते दीक्षारम्भकार्यक्रमः आयोजितः । परिसरस्य निदेशकवर्याणां द्वारा एतस्य कार्यक्रमस्य उद्घाटनं जातम्। परिसरस्य अध्यापकाः तत्तच्छास्त्रमधिकृत्य छात्राणाम् उद्बोधनं कृतवन्तः ।




मुम्बईपरिसरस्य नाशिकपरिसरं प्रति स्थानान्तरणं जातम् । नूतनपरिसरस्य भवनप्रवेशकार्यक्रमः ३१.०७.२०२४ दिनाङ्के आयोजितः । अस्मिन् कार्यक्रमे श्रीमज्जगद्गुरुरामानुजाचार्यस्वामीवासुदेवाचार्य-स्वामीपादाः उपस्थिताः आसन् । वे.मू.रवीन्द्रपैठाणे महोदयानाम् आचार्यत्वे पूजनकार्यक्रमः सम्पन्नः ।










विश्वविद्यालयस्य नासिकपरिसरे १९.०८.२०२४ तः २६.०८.२०२४ पर्यन्तं संस्कृतसप्ताहस्य आयोजनं कृतम्। सप्ताहेऽस्मिन् व्याख्यानं, विभिन्नस्पर्धाः, सम्भाषणशिबिरम् इति एतादृशानां कार्यक्रमाणाम् आयोजनं कृतम् आसीत् । प्रो. रामचन्द्रमहोदयेन अस्य समन्वयकत्वेन कार्यं निरूढम् । कार्यक्रमेऽस्मिन् वे. मू. कृष्णशास्त्रीपळसकरः, संदीपदेशमुखः, डॉ. शेषनारायणत्रिपाठी, डॉ. गजाननअम्भोरे इत्यादयः मान्याः मार्गदर्शनं कृतवन्तः ।







नासिकपरिसरे NCC द्वारा स्वच्छताभियानम् आयोजितम् । स्वच्छताभियाने रताः परिसरस्य छात्राः अध्यापकाः च। केन्द्रीयसंस्कृतविश्वविद्यालयस्य गुरुवायूरपरिसरे ०८/११/२०२४ तः १०/११/२०२४ तमदिनाङ्कपर्यन्तं समायोजिते दक्षिणवलयस्य युवमहोत्सवे परिसरस्यास्य अनेके छात्राः भागग्रहणं कृतवन्तः। तत्र क्रमशः सुवर्णपदकम् – १, रजतपदकानि – ८, कांस्यपदकानि -१४ च प्राप्य तृतीयस्थानेन सम्मानितः अभूवन्। डा. शङ्कर आन्धळेमहोदयः परिसरीयसंयोजकः आसीत् ।

भगवान् बिरसामुण्डाजयन्ती कार्यक्रमः परिसरेऽस्मिन् समायोजितः। तत्र श्रीभास्करखांडवीमहोदयः, प्रान्तसचिवः, वनवासीकल्याण आश्रमः मुख्यातिथित्वेन उपस्थितः आसीत्। परिसरनिदेशकः प्रो. श्रीगोविन्दपाण्डेयमहोदयानाम् आध्यक्ष्ये कार्यक्रमोऽयं सम्पन्नः। डा. इन्द्रकुमारमीनामहोदयः अस्य कार्यक्रमस्य संयोजकः आसीत् । कार्यक्रमेऽस्मिन् परिसरस्य सदस्याः, छात्राः, कर्मचारिणश्च उपस्थिताः आसन्।




# केन्द्रीय संस्कृत विश्वविद्यालय

नासिक परिसर, सिद्ध पिंपरी, महाराष्ट्र - 422 003




मुम्बादेवीआदर्शसंस्कृतमहाविद्यालयस्य संयुक्ततत्त्वावधानेन नासिकपरिसरे ०३ तः ०४/१२/२०२४ तमदिनाङ्कपर्यन्तं परिसरनिदेशकस्य मार्गदर्शने भारतीयज्ञानपरम्परायां मनोवैज्ञानिकसिद्धान्ताः तत्समसामयिकोपयोगिता च इति विषये द्विदिवसीया राष्ट्रीयसङ्गोष्ठी परिसरनिदेशकः प्रो. श्रीगोविन्दपाण्डेयमहोदयानाम् आध्यक्ष्ये समायोजिता। तत्र उद्घाटनसत्रे मुख्यातिथिरूपेण महात्मागान्धी-अन्ताराष्ट्रियहिन्दीविश्वविद्यालयस्य पूर्वकुलपतिः प्रो. गिरीश्वरमिश्रमहोदयः उपस्थाय न्यायशास्त्रे निहितं मनोविज्ञानं सुष्ठु प्रत्यपादयत्। विशिष्टातिथिरूपेण विश्वविद्यालयस्य शिक्षाशास्त्रविद्यास्थानस्य अधिष्ठाता प्रो. लोकमान्यमिश्रमहोदयः उपस्थितः।

अस्यां संगोष्ठ्यां विविधेभ्यः राज्येभ्यः समागताः अनेके विद्वांसः पत्रप्रस्तुतिम् अकुर्वन्। समापनसमारोहे महाराष्ट्रस्वास्थ्यविश्वविद्यालयस्य कुलपतिः प्रो. मिलिन्द बी. निकुम्भमहोदयः मुख्यातिथिरूपेणोपस्थाय संस्कृतस्य महत्त्वं प्रत्यपादयत्। विशिष्टातिथिरूपेण मुम्बईविश्वविद्यालयस्य विज्ञान-तन्त्रज्ञानविभागस्य अध्यक्षः प्रो. मन्दारभानुशे महोदयः उपस्थाय भारतीयज्ञानपरम्परायाः रक्षणं करणीयमित्यवदत्। कार्यक्रमस्य समन्वयकः डा. कुमारः, संयोजकः डा. पि. विद्याधरः, सहसंयोजकः डा. दशरथभरासागरः अवसरेऽस्मिन् उपस्थितः आसीत्। कार्यक्रमस्य अपरसंयोजकः डा. गणपति वि. हेगडेमहोदयः कार्यक्रमसंचालमकरोत्।








केन्द्रीयसंस्कृतविश्वविद्यालयस्य गङ्गानाथझापरिसरः, प्रयागराजः प्रयागविद्वत्परिषद् इत्यनयोः संयुक्ततत्त्वाधाने दिनाङ्के १२/०७/२४ विचारगोष्ठी पुस्तकलोकार्पणञ्चेति कार्यक्रमेण सह योगाशिविरोद्घाटनं विहितम्। विश्वविद्यालयस्य माननीयकुलपतिश्रीनिवासवरखेडीमहोदयस्य संरक्षकत्वे सम्पन्नेऽस्मिन् कार्यक्रमे मुख्यातिथिरूपेण माननीयन्यायमूर्तिश्रीराहुलचतुर्वेदिनः, मुख्यवक्तृरूपेण वरिष्ठपत्रकारश्रीवीरेन्द्रपाठकाः, सारस्वतातिथिरूपेण उत्तरप्रदेश लोकसेवाऽऽयोगस्य अध्यक्षचराः प्रो. के.बी पाण्डेयाः, विशिष्टातिथिरूपेण अपरनगरायुक्ताः, प्रयागराजः श्रीदिपेन्द्रयादवाश्च समागताः। कार्यक्रमेऽस्मिन् श्रीवीरेन्द्रपाठकविरचितस्य "प्रयागराज के वैदिक पौराणिक तीर्थ-माधव के स्थान" पुस्तकस्यास्य विमोचनमभवत्। समारोहेऽस्मिन् समुद्घाटितयोगशिविरस्य उद्देश्यं परिचयञ्च परिसरीययोगशिक्षकः डॉ. अञ्जनीकुमारपुण्डरीकः प्रस्तुतवान्। वैदिकमङ्गलाचरणं सरस्वतीवन्दनां च परिसरीयशोधच्छात्रा साधना, सुधा च कृतवती। अतिथीनां वाचिकस्वागतं डॉ. मनीषजुगरानः कृतवान्। धन्यवादज्ञापनञ्च प्रो. अपराजितामिश्रा कृतवती। कार्यक्रमस्य सञ्चालनं डॉ. धीरजकुमारमिश्रः कृतवान्। कार्यक्रमस्यास्य आध्यक्षं परिसरनिदेशकैराचार्यललितकुमारत्रिपाठिभिर्विहितम्।




केन्द्रीयसंस्कृतविश्वविद्यालयस्य गङ्गानाथझापरिसरेण Colonial Discourse and the Suffering of Hindu Children इत्यमुं विषयमधीकृत्य विशिष्टव्याख्यानस्य आयोजनं कृतम्। यत्र मुख्यवक्तृरूपेण हिन्दपीडिया इति संस्थायाः संस्थापकाः निदेशकाश्च श्रीकृष्णमाहेश्वरीमहाशयाः समागताः। व्याख्यानस्य विषयप्रवर्तनं अतिथीनां वाचिकस्वागतञ्च संगोष्ठीसंयोजकैराचार्यदेवदत्तसरोदेमहाशयैः कृतम्। धन्यवादज्ञापनं डॉ मोनालीदासः विहितवती। कार्यक्रमेऽस्मिन् परिसरीयाः आचार्याः, छात्राः, कर्मचारिणश्च समुपस्थिताः आसन्। कार्यक्रमस्यास्य आध्यक्षं परिसरनिदेशकैराचार्यललितकुमारत्रिपाठिभिर्विहितम्।



केन्द्रीयसंस्कृतविश्वविद्यालयस्य गङ्गानाथझापरिसरस्थभाषाविभागद्वारा परिसरीयकर्मचारिणां कृते सरलमानकसंस्कृतशिक्षणकार्यशालायाः आयोजनं कृतम्। अस्यां कार्यशालायां सर्वेऽपि कार्यालयकर्मचारिणः मासं यावत् संस्कृतसम्भाषणस्य अभ्यासं कृतवन्तः। कार्यशालायां डॉ. मनीषजुगरानमहोदयः भाषाभ्यासं कारितवान्। अभ्यासवर्गस्यास्य आध्यक्षं परिसरनिदेशकैराचार्य-ललितकुमारत्रिपाठिभिर्विहितम्।



केन्द्रीयसंस्कृतविश्वविद्यालयस्य गंगानाथझापरिसरेण, प्रयागस्थितेन स्वतन्त्रतादिवसः सानन्दं समायोजितः। परिसरनिदेशकैः आचार्यललितकुमारत्रिपाठिभिः ध्वाजारोहणपुरस्सरं कार्यक्रमस्यास्य समुद्घाटनं कृतम्। पुनीतेऽस्मिन्नवसरे तैः स्वतन्त्रतायै हुतात्मनां राष्ट्रभक्तानां जीवनवृत्तं सविशदं चर्चितम्। तेषामेव नेतृत्वे परिसरसमीपस्थ-राष्ट्रभक्तचन्द्रशेखर-आजादानां प्रतिमासन्निधौ गत्वा परिसरपरिवारः राष्ट्रभक्तशिरोमणीनां चन्दिरचरणकमलयुगले पुष्पाञ्जलिं स्वकीयहार्दभावञ्च निवेदितवान्। अवसरेऽस्मिन् परिसरीयप्राध्यापकाः, छात्राः, कर्मचारिणश्च समुपस्थिताः आसन्।





केन्द्रीयसंस्कृतविश्वविद्यालयस्य गङ्गानाथझापरिसरेण संस्कृतसप्ताहः आचरितः। संस्कृतसप्ताहान्तर्गते विद्यालयस्तरे, महाविद्यालयस्तरे च प्रतियोगिताः आयोजिताः। समायोजितानां प्रतियोगितानां पुरस्कारवितरणसमारोहः २३/०८/२४तमे दिनाङ्के समायोजितः। यत्र षड्पञ्चाशत् छात्राः पुरस्कृताः। समारोहेऽस्मिन् मुख्यातिथिरूपेण श्रीमन्तः बृजेशकुमारमिश्रमहाभागाः अधीक्षकाः (पुलिसप्रशिक्षणकेन्द्रम्, सुल्तानपुरम्) सरस्वतातिथिरूपेण प्रो. हरिदत्तशर्ममहाशयाः अध्यक्षचराः संस्कृतविभागः इलाहाबादविश्वविद्यालयः, प्रयागराजः उपस्थिताः आसन्। कार्यक्रमस्यास्यैव अङ्गत्वेन राष्ट्रीय-अन्तरिक्षदिवसोऽपि समायोजितः। उक्तकार्यक्रमेऽस्मिन् परिसरप्राध्यापकाः, छात्राः, कर्मचारिणश्च सम्मिलिताः आसन्। कार्यक्रमस्यास्य अध्यक्षता परिसरनिदेशकैराचार्यललितकुमारत्रिपाठिभिः कृता।




केन्द्रीयसंस्कृतविश्वविद्यालयस्य प्रयागस्थिते गङ्गानाथझापरिसरे स्वच्छतापखवाडा समायोजिता। यत्र परिसरप्राध्यापकाः कर्मचारिणश्च स्वच्छतासहयोगं दत्तवन्तः। कार्यक्रमस्यास्य संयोजनं डॉ. सुरेशपाण्डेयमहोदयेन कृतम्।




केन्द्रीयसंस्कृतविश्वविद्यालयस्य गङ्गनाथाझापरिसरेण, प्रयागस्थितेन विश्व-आयुर्वेदमिशनसंस्थानेन च १४/०९/२०२४ दिनाङ्के हिन्दीदिवससमारोहः वैज्ञानिकसंगोष्ठी च समायोजिता। यत्र वैदिकवटवः वैदिकमङ्गलाचरणमकार्षुः। शोधच्छात्रा सुधा सरस्वतीवदनां कृतवती। डॉ. अवनीशपाण्डेयः धन्वन्तरिवन्दनां कृतवान्। समागतानामतिथीनां वाचिकस्वागतं प्रो. देवदत्तसरोदेमहोदयैः कृतम्। प्रो. गिरीन्द्रसिंहतोमरमहाशयेन समागतानामतिथीनां परिचयपुरस्सरं विषयोपस्थानञ्च विहितम्। समारोहेऽस्मिन् विशिष्टातिथिरूपेण डॉ. शान्तिचौधरीमहाशयाः, मुख्यातिथिरूपेण डॉ. अशोककुमारवार्ष्णेयमहाशयाश्च समुपस्थिताः आसन्। अभ्यागतानां विदुषां धन्यवादज्ञापनं डॉ. शुभश्रीदासेन कृतम्। कार्यक्रमस्य सञ्चालनं सुश्री-अश्विनीलङ्केमहोदया कृतवती। समारोहेऽस्मिन् परिसरप्राध्यापकाः, छात्राः, कर्मचारिणः अन्ये च चिकित्सकाः, सम्मानितनागरिकाश्च सम्मिलिताः आसन्। कार्यक्रमस्यास्य अध्यक्षतां परिसरनिदेशकाः प्रो. ललितकुमारत्रिपाठिनः विहितवन्तः।







केन्द्रीयसंस्कृतविश्वविद्यालयस्य गङ्गानाथपरिसरे परिसरस्य महर्षिभरद्वाजवेदविद्यासमित्याश्च संयुक्तोपक्रमे वेदपूजनमहोत्सवः समाचरितः। यत्र वैदिकवटवः चातुर्वेदपरायणं कृतवन्तः।




केन्द्रीयसंस्कृतविश्वविद्यालयस्य गंगानाथझापरिसरेण हिन्दीपखवाडासमापनसमारोहः समायोजितः। समारोहस्यास्याङ्गत्वेन विभिन्नाः प्रतियोगिताः समायोजिताः। यासु परिसरपरिवारसदस्याः सानन्द भागमगृह्णन्। प्रतियोगितासु प्राप्तस्थानानां सदस्यानां कृते पुरस्कारवितरणं समापनसमारोहे कृतम्। अथ च प्रतियोगितानां निर्णायकानां सम्माननञ्च विहितम्। विशिष्टातिथिरूपेण श्रीवीरेन्द्रपाठकः (वरिष्ठवार्ताकारः प्रयागराजः) मुख्यातिथिरूपेण च श्री अर्जुनकुमारसिंहः (सहायककुलसचिवः इलाहाबादविश्वविद्यालयः, प्रयागराजः) समारोहममुं सभाजितवन्तौ। अवसरेऽस्मिन् सरस्वतिवन्दनां परिसरीयशोधच्छात्रा सुधामिश्रा कृतवती। अतिथिनां स्वागतं कार्यक्रमसञ्चालञ्च समारोहसंयोजकः डॉ. श्यामसुन्दरपाण्डेयः कृतवान्। धन्यवादज्ञापनं डॉ. मोनालीदासः कृतवती। कार्यक्रमेऽस्मिन् परिसरीयप्राध्यापकाः, छात्राः, कर्मचारिणश्च आसन्। आध्यक्षञ्च परिसरनिदेशकाः प्रो. ललितकुमारत्रिपाठिनः विहितवन्तः।


गंगानाथझापरिसरेण परिसरपरिचालितपाण्डुलिपिविज्ञान-पुरालिपिशास्त्र- डिप्लोमापाठ्यक्रमस्य समुद्घाटनं ऑनलाईन माध्यमेन विहितम्। यत्र मुख्यवक्तृरूपेण डॉ. वसन्तभट्टमहाशयाः स्वकीयं मुख्यव्याख्यानं कृतम्। वैदिकसंशोधनमण्डलं पूना, इत्यस्य निदेशकाः डॉ सुब्रह्मण्यम्महाशयाः अपि छात्रान् उद्बोधितवन्तः। समुद्घाटनसमारोहस्य सञ्चालनं प्रो. अपराजितामिश्रा, अध्यक्षः पाण्डुलिपिविज्ञानपुरालिपिविद्याशाखा कृतवती। पाठ्यक्रमेऽस्मिन् सप्ततिः छात्राः प्रवेशं लब्धवन्तः। क्रार्यक्रमस्यास्य अध्यक्षता परिसरनिदेशकैराचार्यललितकुमारत्रिपाठिभिर्विहितम्।



केन्द्रीयसंस्कृतविश्वविद्यालयस्य गंगानाथझापरिसरे, प्रयागराजे पुस्तकालयसंग्रहालयप्रबन्धनञ्च विषयेऽस्मिन् अन्ताराष्ट्रियपरिसंवादः समायोजितः। अवसरेऽस्मिन् मुख्यातिथिरूपेण प्रो. अचलपण्ड्याः (इन्दिरागांधीराष्ट्रीयकलाकेन्द्रम् नई दिल्ली) समुपस्थिताः आसन्। विशिष्टातिथिरूपेण प्रो. मोको (हेदरब्राउनपुस्तकालयाध्यक्षाः आस्ट्रेलियन लाइब्रेरी एसोसिसन्, आस्ट्रेलिया ) अथ च सनीना वी वी (विरिष्ठसंरक्षण-अधिकारिणः सिंगापुर-म्यूजियम,सिंगापुरम्) समुपस्थिताः आसन्। अन्ये आभारतं व्याप्तपुस्ताकलयविशेषज्ञाः, परिसरप्राध्यापकाः समुपस्थिताः आसन् कार्यक्रमस्य अध्यक्षतां परिसरनिदेशकाः प्रो. ललितकुमारत्रिपाठिनः विहितवन्तः।



प्रयागराजे समायोज्यमाने कुम्भमहोत्सवे केन्द्रीयसंस्कृतविश्वविद्यालयेन विभिन्नाः कार्यक्रमाः समायोजयिष्यन्ते। निर्णयोऽयं गंगानाथझापरिसरे विश्वविद्यालस्य माननीयकुलपतीनामाचार्य-श्रीनिवासवरखेडीमहाशयानां आध्यक्षे सम्पन्नोपवेशने सञ्जातः। यत्र इमे प्रमुखनिर्णयाः समित्या स्वीकृताः। प्रतिपरिसरं छात्राः प्रयागवैभवदर्शनार्थं प्रयागमागमिष्यन्ति। ज्ञानकुम्भः इत्यस्य समायोजनम्, विश्वविद्यालयपुस्तविक्रयकेन्द्रस्थापनम्, संस्कृतनाट्यमञ्चनम्, शास्त्रार्थसभासमायोजनम्, कुम्भमाहात्म्यसम्बद्धशोधपत्रप्रकाशनम्। उपवेशनेऽस्मिन् प्रो. ललितकुमारत्रिपाठिनः (निदेशकः, गंगानाथझापरिसरः) परिसरप्राध्यापकाः डॉ. पूर्णेन्दुमिश्रः, इत्यादयश्च उपस्थिताः आसन्।




केन्द्रीयसंस्कृतविश्वविद्यालयस्य गंगानाथझापरिसरेण संविधानदिवसः, जनजातीयगौरवदिवसश्च समायोजितः। यस्य मुख्यातिथिरूपेण श्रीप्रवीणगिरिः (अपर-महाधिवक्ता, उत्तरप्रदेशः) विशिष्टातिथिरूपेण श्रीप्रभूतिकान्तत्रिपाठी (अतिरिक्त-स्थाई-शासकीय-अधिवक्ता,उत्तरप्रदेशः) समुपस्थिताः अभुवन्। मुख्यातिथिना श्रीप्रवीणगिरिणा संविधानसिद्धान्ताः रामचरितमानसानुरूपाः व्याख्यायिताः। जनजातीयगौरवदिवसमुपलक्ष्य तद्वैशिष्ट्यं परिसरीयसंगणकशिक्षकेण श्रीराजेशकान्ततिवारिणा प्रतिपादितम्। तत्रापि विशेषतः श्रीबिरसामुण्डामहाशयानां विशदचरित्रवर्णनमधिसभं व्याख्यायितम्। समारोहेऽस्मिन् परिसरीयप्राध्यापकाः, शोधच्छात्राः, कर्मचारिणश्च आसन्। कार्यक्रमस्य सञ्चालनं डॉ. श्यामसुन्दरपाण्डेयन कृतम्। आध्यक्षञ्च परिसरनिदेशकैराचार्यललितकुमारत्रिपाठिनः विहितवन्तः।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य, गङ्गानाथझापरिसरे, पाण्डुलिपिसंग्रहालयेन हस्तलेखक्रयसम्बन्धिप्रक्रियायै क्रयसमितेरूपवेशनं १७/१२/२०२४ दिनाङ्के समायोजितम्। यत्र समितिसदस्याः प्रो. मनोजकुमारमिश्राः, प्रो. देवदत्तसरोदेमहाशयाः, प्रो. अपराजितामिश्रामहोजयाः, सुश्री अश्विनी-लङ्केमहाशयाः, अनुभागघिकारिणः, माननीयकुलपतीनां नामितसमितिसदस्येषु डॉ. अनिर्वाणदाशमहाशयाः, डॉ. विनायकाचार्यनामण्णवरमहाशयाश्च समुपस्थिताः आसन्। यत्र समित्या प्राप्तपाण्डुग्रन्थानां सूक्ष्मेक्षिकया निरीक्षणं कृतं तदुपयोगिताविषये च बहुचर्चा कृता। उपवेशनमिदं परिसरनिदेशकानामाचार्यललित-कुमारत्रिपाठिनामध्यक्षे सुसम्पन्नतामगात्।





गंगानाथझापरिसरः, शिक्षा-उत्थानन्यासः इत्यनयोः संयुक्ततत्त्वाधाने प्रयागराजे सम्पद्यमानकुम्भमहोत्सवे समायोजिष्यमाणज्ञानमहाकुम्भस्य समायोजनविषयकं उपवेशनमनुष्ठितम्। उक्तोपवेशने विभिन्नशैक्षणिकसंस्थानां कुलपतयः, निदेशकाः, विद्वांसः, शिक्षाविदः, भागं गृहीतवन्तः। अवसरेऽस्मिन् श्रीमान् अतुलकोठारिमहाशयाः, राष्ट्रियसचिवाः, शिक्षासंस्कृत-उत्थानन्यासः, ज्ञानमहाकुम्भसमारोहस्य विस्तृतवर्णनं प्रस्तुतवन्तः। श्रीसंजयस्वामिमहाशयाः, संयोजकः, ज्ञानमहाकुम्भः समेषां स्वागतं कृतवन्तः। परिसरनिदेशकाः प्रो. ललितकुमारत्रिपाठिनः अतिथीनां धन्यवादज्ञापनं कृतवन्तः। अवसरेऽस्मिन् इमे गणमान्याः उपस्थिताः। प्रो. योगेशप्रतापसिंहः कुलपतिः राष्ट्रियविधिविश्वविद्यालयः त्रिपुरा, डॉ. सविता सेंगरः कुलपतिः राँची झारखण्डः, डॉ. अखिलेशकुमारसिंहः कुलपतिः प्रो. राजेन्द्रप्रसादसिंह (रज्जूभैया) विश्वविद्यालयः प्रयागराजः, प्रो. वांग्छुगदोरजीनेगी कुलपतिः केन्द्रीय-उच्च-तिब्बतन-अध्ययनसंस्थानम् सारनाथः वाराणसी, डॉ. शोभा पैठणकरः पूर्वकुलपतिः इन्दौर म.प्र., श्री संजयशुक्लः निदेशकः स्प्रिंगर ग्रुप आफ एजुकेशन प्रयागराजः, श्रीबद्रीनारायणः निदेशकः गोविन्दबल्लभपन्तशोधसंस्थानम् प्रयागराजः, प्रो. रमाशंकरवर्मा निदेशकः मोतीलालनेहरूराष्ट्रियप्रौद्योगिकीसंस्थानम् प्रयागराजः, प्रो. ओमप्रकाशव्यासः निदेशकः भारतीयसूचनाप्रौद्योगिकीसंस्थानम् प्रयागराजः, डॉ. नरेन्द्रकुमारशुक्लः संकायाध्यक्षः इलाहाबादविश्वविद्यालयः प्रयागराजः अन्ये च शिक्षाविदः गणमान्यनागरिकाः परिसरप्राध्यापकाः शोधच्छात्राः कर्मचारिणश्च कार्यक्रमेऽस्मिन् समुपस्थिताः आसन्। कार्यक्रमस्य अध्यक्षता परिसरनिदेशकैराचार्यललितकुमारत्रिपाठिभिर्विहिता।

# शिक्षकोपलब्धि-वीथिका




केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरस्य शिक्षाशास्त्रविद्याशाखायाः विभागाध्यक्षः प्रो. नीलाभतिवारिवर्यः उच्चशिक्षायां राष्ट्रियशिक्षकपुरस्कारेण राष्ट्रपतिना सम्मानितः। महोदयाय अयं पुरस्कारः संस्कृतशिक्षायां गुणवत्तामानेतुं प्रदत्तः।



**कुलपतिः प्रो. श्रीनिवासवरखेडीवर्यः, कुलसचिवः प्रो. रा.गा.मुरळीकृष्णवर्यः, परिसरनिदेशकाः, विश्वविद्यालयस्य सर्वेऽपि अधिकारिणः, कर्मयोगिनश्च शुभकामनां प्रदत्तवन्तः। अनेन सम्मानेन विश्वविद्यालयः सम्मानितः इति नीलाभतिवारिवर्येण उक्तम्।**



**डा.रमानन्दभट्टवर्यस्य २७/१०/२०२४ दिनाङ्के सक्कट्टु-प्रतिष्ठानद्वारा उडुप्यां राजर्षिरवीन्द्रप्रशस्ति-प्रदानेन सभाजनं कृतम्।**

१५/११/२०२४ दिनाङ्के केन्द्रीयसंस्कृतविश्वविद्यालयस्य, संस्कृतभारत्याः, सत्यवतीमहाविद्यालयस्य च संयुक्ततत्त्वावधाने आयोजिते अन्ताराष्ट्रियविदुषीसम्मेलने वेदव्यासपरिसरस्य निदेशिका प्रो. सत्यमकुमारी महोदया विदुषीसम्मानेन विभूषिता।







दिसम्बरमासस्य १३-१५ दिनाङ्केषु राष्ट्रियज्योतिषसम्मेलने जयपुरे ज्योतिषविद्याशाखायाः डॉ मनोज श्रीमालः 'ज्योतिष-मृङ्गाक' इति उपाधिना विभूषितः।

डा. सन्दीपजोशिमहोदयः, केन्द्रीयसंस्कृतविश्वविद्यालयस्य संस्कृत-ओलम्पियाडपरीक्षायां सामाजिकस्तरे सम्पूर्णभारते प्रथमस्थानं १००/१०० अङ्कान् प्राप्य परिसरस्यास्य कीर्तिम् अवर्धयत।





वेदमूर्तिः पद्मविभूषितश्रीपाददामोदरः सातवलेकरः इत्याख्येन महाभागेन प्रणीतस्य चतुर्वेदसुबोधभाष्यस्य पाठसंशोधनाय परिष्काराय च डॉ. सूर्यमणिभण्डारी (सहायकाचार्यः व्याकरणविभागः) देहलीस्थिते डॉ. अम्बेडकर- अन्ताराष्ट्रिय-केन्द्रम् इति स्थाने १८/०९/२०२४ दिनाङ्के राष्ट्रियस्वयंसेवकसंघस्य प्रमुखेण श्रीमता मोहनभागवतमहाभागेन पुरस्कृतः।

# शिक्षकोपलब्धि-वीथिका

केन्द्रीयसंस्कृतविश्वविद्यालयस्य आभारते विद्यमानानां परिसराणाम् आचार्याः तदीयपरिसरे सहनिदेशकपदम् अलङ्कृतवन्तः। तेभ्यः आचार्येभ्यः संस्कृतवार्तापक्षतः अभिनन्दनानि।



प्रो. चन्द्रकला आर् कोण्डि
देवप्रयागपरिसरः



प्रो. चन्द्रकान्तभट्टः
शृंगेरीपरिसरः



प्रो. वाई.एस्.रमेशः
जयपुरपरिसरः



प्रो. नीलाभतिवारी
भोपालपरिसरः



प्रो. गुरुचरणनेगी
लखनऊपरिसरः



प्रो. मञ्जुनाथभट्टः
वेदव्यासपरिसरः



प्रो. रामचन्द्रजेयिस हेच्
नासिकपरिसरः



प्रो. देवदत्त सरोदे
प्रयागपरिसरः



प्रो. विजयपालकछवाहा
सदाशिवपरिसरः



प्रो. सतीशकुमारकपूरः
जम्मूपरिसरः




प्रो. प्रतिभा आर्
गुरुवायूरपरिसरः

कर्णाटकराज्यस्य सिरसि-उपमण्डलस्थ सोन्दास्वर्णवल्लीमहासंस्थाने नवम्बरमासस्य १६,१७ दिनाङ्कयोः राज्यस्तरीयवाक्प्रतियोगिता सम्पन्ना। तत्र च परिसरीयच्छात्राः सोत्साहं भागं गृहीत्वा भाषणादिस्पर्धासु पुरस्कारान् प्राप्तवन्तः ।



अच्युत हेगडे अरुषा राजेश्वरी रम्या श्रीनिधिभट्टः सप्तमी सुहाना गुप्ता


केन्द्रीयसंस्कृतविश्वविद्यालयस्य विविधपरिसरस्य छात्राः राष्ट्रियपात्रतापरीक्षा (NET-JRF) उत्तीर्णाः । एतेषां सफलतायै माननीयकुलपतयः, कुलसचिवाः, शैक्षणिक अधिष्ठाता, परिसरनिदेशकाश्च शुभकामनां दत्तवन्तः ।



पारुलमेश्रामः नागार्जुनविष्टः इन्द्रदीपशाक्यः अखिलेशबसेड़िया अवनीशपाण्डेयः अपराजिता अंशुः प्राञ्जल दशोरा



भार्गवीभट्टः पूर्णिमा अनिमेशदेबशर्मा इला शर्मा प्रीति कुमारी शाश्वती भारद्वाज गौरवपुरोहितः



दृढता जैन दिव्या शर्मा प्रियङ्का सुष्मित जैन आयुष जैन गुरकृष्णदाशः चञ्थांग परी केइपेंग

केन्द्रीयसंस्कृतविश्वविद्यालयस्य शोधच्छात्रौ श्वेताघटक, देवेशमिश्रः च ICSSR इति संस्थायां शोधवृत्यर्थं चितौ। विश्वविद्यालयस्य शोधच्छात्राः प्रथमं वारम् अस्यां संस्थायां चिताः। अवसरेऽस्मिन् शैक्षणिक-अधिष्छाता प्रो. मदनमोहनझावर्यः सर्वेभ्यः शुभकामनां दत्तवान्।





# छात्रोपलब्धि-वीथिका

केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरस्य विविधविद्याशाखायाः छात्राः बिहारलोकसेवा-आयोगेन आयोजितायां शिक्षकचयनपरीक्षायां चिताः। विश्वविद्यालयस्य कुलपतयः प्रो. श्रीनिवासवरखेडीवर्याः सर्वेषां छात्राणां कृते शुभाशीः मङ्गलकामनाः च दत्तवन्तः। कुलसचिवाः,परिसरनिदेशकाः, सहपरिसरनिदेशकाः, सर्वेऽपि प्राध्यापकाः शुभकामनां दत्तवन्तः।


शुभस्मितारथः


उमाकान्तमिश्रः


अविनाश आर्यः


शिवकान्तदुबे


गजेन्द्रपाण्डेयः


आयशमिश्रः


अमनमिश्रः


अनिलपाठकः

श्रीरणवीरपरिसरस्य छात्रा शीतलकुमारी रूपकमहोत्सवे सर्वोत्कृष्टनायिकापुरस्कारेण सभाजिता।





मुख्यालयस्य शोधच्छात्रः श्री श्रीशसमीर के.एस् राष्ट्रियशोधपत्रलेखन प्रतियोगितायां देहलीक्षेत्रे शोधार्थी-उत्कृष्टशोधपत्र-पुरस्कारं प्राप्य विश्वविद्यालयस्य कीर्तिः वर्धितः। एवं मुख्यालये शोधसहायक पदे नियुक्तः अपि ।



शोधच्छात्रः श्रीविनयकुमारशुक्लः मुख्यालये शोधसहायकपदे नियुक्तः।



शोधच्छात्रः श्रीशरण्यः पि कालिकट् आदर्श संस्कृतमहाविद्यालये सहायक अध्यापकपदे नियुक्तः।



शोधच्छात्रः श्री नरसिंहभट्टः विश्वविद्यालयस्य गुरुवायूरपरिसरे अतिथिसहायकाचार्य-पदे नियुक्तः।